117
/
1

Atha nyaykoustoubhiyeshwarvad

"अथ न्यायकौस्तुभीयेश्वरवादः"

117/1

न्यायकौस्तुभीयेश्वरवादारंभः क्रियते

वा॰ श्रीगणेशाय नमः ॥ सांबं शिवं नमस्कृत्य महादेवः सतां मुदे ॥ तार्किकाभिमतं मानमीश्वरे वक्ति नत्वतः ॥
१ १ ॥ अत्रेश्वरे आत्मत्वं जीवभिन्नवृत्ति नवा जीवभिन्नं ज्ञानादिमन्नवा जन्यं सकर्तृकं न वेत्यादि विप्रतिपत्तोरीश्व-
रे प्रमाणमनुमानमेवेति नैयायिकाः ॥ तच्च जन्यं सकर्तृकं कार्यत्वात् घटादिवदित्याकारकं ॥ न च वेदस्यापी-
श्वरे प्रमाणत्वसंभवेन कथमनुमानमेवेति वाच्यं ॥ वेदस्येश्वरोक्तत्वेनैव प्रामाण्येनेश्वरसिद्धिं विना तस्य
प्रमाणत्वासंभवात् ॥ अन्यथाऽन्योन्याश्रयात् ॥ एतेनेश्वरे वेदोनुमानं च प्रमाणं उपायस्योपायांतरादूषक-
त्वादिति महतामुक्तिः परास्ता ॥ न चात्र घटादेर्जन्यत्वेन पक्षतया कथं दृष्टांतत्वमिति वाच्यं ॥ पक्षैकदेशस्या-
पि दृष्टांतत्वे बाधकाभावात् ॥ साध्यसाधनवत्तया निश्चितस्यैव दृष्टांतत्वेनं तत्त्वेन पक्षभिन्नत्वस्य तत्रातंत्र-
त्वात् ॥ नन्वत्र साध्यं सकर्तृकत्वं कृतिमज्जन्यत्वं लाघवान्मतुबर्थपरित्यागेन कृतिजन्यत्वपर्यवसितं तथा-
च जन्ये क्षित्यंकुरपर्वतादावस्मदादिकृतिजन्यत्वबाधे तादृशकृतिजन्यत्वं तादृशकृत्याश्रयत्वेनेश्वर- रम॰
सिद्धिरभिमतं तत्र च जन्यत्वरूपपक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतांगीकारे रागजन्यत्वस्या १

मानाधिकरण्येन घटादौ सिद्धसाधनस्यादोषत्वेपि जन्यत्वावच्छेदेन क्षित्यादिजनकादृष्टजनकांश्च यागा
दिगोचरकृतिजन्यत्वमादाय सिद्धसाध~~नस्यादोषत्वेपि जन्यतावच्छेदेन क्षित्यादिजनकाद~~ नापंतिरयोर्दो
षत्वं दुष्परिहरमेवेति चेदत्र प्राचीनानुयायिनः। अत्र कृतिजन्यत्वमात्रं न साध्यं किंतु स्वोपादानगोचरापरो
क्षज्ञानचिकीर्षासमानाधिकरणकृतिजन्यत्वं गोचरांतं समानाधिकरणांतं च कृतिविशेषणं तथा सति
नोक्तदोषः। यागादिगोचरास्मदादिकृतेः स्वोपादानगोचरत्वाभावात्। न च गोचरांतेनैवोक्तदोषवारणे स
मानाधिकरणांतं कृतिविशेषणमनर्थकमिति वाच्यं॥ व्यावर्त्याभावेपि उपरंजकत्वेनैव तथाविधविशेष
णस्य सार्थकत्वात्॥ उपरंजकत्वं चोद्देश्यीभूतस्वघटितसाध्यसिद्धिविषयत्वं। प्रकृते च तादृशसमा
नाधिकरणत्वेन कृतिसिद्धेरुद्देश्यत्वादुपपन्नं॥ एतदभिप्रायक एव व्यापके व्यर्थविशेषणत्वेन दोषा
येति प्राचां प्रवादः॥ न च तथापि दृष्टांतपक्षसाधारणस्वत्वस्यैकस्याभावात्तद्घटितधर्मस्य साध्य
त्वं न संभवतीति वाच्यं॥ प्राचीनमते स्वत्वस्यैकत्वात्॥ अन्यथा स्वापितन्मोद्घातक्रांतौ स्वहारानुगच्छे

२ देवेसादेस्वृत्तेन चैत्रादीनां सर्वानुभवसिद्धबोधस्यानुपपत्तेः॥ समवायसंबंधेन कार्यत्वावच्छिन्नं प्रतिविषयता
प्रत्यासत्त्यैवोपादानगोचरकृत्यादेर्हेतुत्वेपविषयता प्रत्यासत्त्यवच्छिन्नतयाविधकृतिनिष्ठकारणतानि
रूपितसमवायसंबंधावच्छिन्नकार्यत्वस्यतदर्यत्वसंभवेन स्वत्वस्यैकाभावेपि ज्ञप्तिविरहात्। नचैव
मपिध्वंसेबाधः। तस्यासमवेतत्वेनसमवायसंबंधावच्छिन्नकार्यत्वघटितसाध्याभावादितिवाच्यं॥
सत्वविशिष्टजन्यत्वस्यपक्षतावच्छेदकत्वात्। नचध्वंसेव्यभिचारः। भावत्वविशिष्टकार्यत्वस्यहेतुत्वात्।
अत एवात्रजन्यत्वस्यपक्षतावच्छेदकत्वेन कार्यत्वरूपहेतोरपि प्रागभावप्रतियोगित्वादिरूपजन्यत्वा
त्मकत्वेनैक्यात्सिद्धसाधनं। नचकृतिसाध्यत्वरूपकार्यत्वंहेतुरितिवाच्यं॥ असिद्धेरितिपरास्तं॥ स
मानविशेष्यतावच्छेदकताकसिद्धेरेवानुमितिप्रतिबंधकत्वेनसिद्धसाधनाभावात्। केचित्तुकेवलका
र्यत्वस्यहेतुत्वेपिनसिद्धसाधनं॥ केवलकार्यत्वाधिकरणेव्याप्तिघटकतया प्रवृत्तं तत्साध्यसिद्धावपि एम॰
निरुक्तविशिष्टपक्षतावच्छेदकाधिकरणेतत्सिद्धेः। अमूनविषयकसिद्धेरेवानुमितिप्रतिबंधकत्वा २

दित्याहुः ॥ तन्न ॥ ध्वंसे व्यभिचारेण केवलकार्यत्वस्य हेतुत्वासंभवात् । वस्तुतस्तु समवायसंबंधावच्छिन्नका
र्यत्वस्य हेतुत्वेनैव व्यभिचारानवकाशः । युक्तं चैतत् ॥ तादृशसंबंधघटितकार्यकारणभावस्यैवात्रानु
कूलतर्कत्वात् ॥ केचित्तु । प्रागभावप्रतियोगित्वात्मककार्यत्वघटकप्रतियोगितायां समवायसंबंधाव
च्छिन्नत्वनिवेशान्न व्यभिचारः । इह कपाले समवायेन घटो भविष्यति न संयोगेनेत्यादिप्रतीत्या प्राग
भावस्यापि प्रतियोगितावच्छेदकसंबंधांगीकारादित्या— रिति वदंति ॥ नव्यास्तु । साध्यं न स्वोपादान
गोचरत्वगर्भं किंतु तत्प्रागि ध्वंसकृतिनिष्ठजनकतानिरूपितजन्यत्वमात्रं । न चोक्तदोषः । अदृष्टद्वारक
त्वेन जनकतापा विशेषणीयत्वादित्याहुः । तेषामयमाशयः । निरुक्तसमवायसंबंधावच्छिन्नकार्यता
त्मकस्वोपादानगोचरत्वगर्भसाध्यकरणे कार्यसामान्यं प्रतीश्वरकृतिः कारणमिति प्राचीनप्रवादे
न संगच्छते समवेतकार्यं प्रत्येव तस्या हेतुतया ध्वंसाजनकत्वेनोपदर्शितप्रवादव्याघातात् ॥ अस्म
न्मते च ध्वंससाधारणकृतिजन्यत्वस्य साध्यत्वेन तद्व्याघाताभावात् ॥ न च निर्युक्तिकप्रवादस्याश्रये

वा० पतपातष्वाघातेदृष्टापत्तिरितिवाच्यं। कथंचित्प्राचीनमवादाविरोधेनोपपत्तौतष्वाघातेदृष्टापत्तेरसांप्रदा
३ यिकत्वात्॥ ननुतपापिध्वंससाधारणजन्यतस्य कालिकसंबंधावछिन्नतपाविधत्वतिनिष्ठकारणतानि
रूपितकालिकसंबंधावछिन्नजन्यतात्मकस्यसाध्यत्वेऽदृष्टाद्वारकत्वविशेषणावैयर्थ्यं क्षित्यादिजन
कादृष्टजनकयागादिगोचरास्मदादिकृतेः क्षित्याद्यव्यवहितपूर्वकालेऽसत्वेनकार्यतावछेदकसंबंधेन
कार्याधिकरणेकारणतावछेदकसंबंधेननियताव्यवहितपूर्ववर्त्तित्वरूपजनकत्वाभावादेवोक्तदो
षानवकाशादितिवेच॥ तन्निष्ठतत्संबंधावछिन्नजनकत्वंहिनतस्यतेनसंबंधेनकार्याव्यवहितपू
र्वक्षणावछेदेनकार्यतावछेदकसंबंधेनकार्याधिकरणेनियमेनवृत्तित्वंयागादीनामपूर्वादिद्वारा
स्वर्गादिकारणतानुपपत्तेः अपितुतत्ष्वापारान्यतरस्यएवंचनविशेषणावैयर्थ्यं क्षित्यादिजन
कादृष्टजनकयागादिगोचरास्मदादिकृतेः क्षित्याद्यव्यवहितपूर्वक्षणावछेदेनकार्यतावछेदककालि रम०
कसंबंधेनक्षित्यादिरूपकार्याधिकरणकालेऽसत्वेपितष्वापारादृष्टस्यसत्वेनकालिकसंबंधावछिन्न ३

जनकतायाः सत्वेनार्थांतरादिदोषस्तद्विशेषणं विनानुद्धारात् तगरादौ पूर्वमते ध्वंसे वा धवारणाय स
त्वविशिष्टजन्यत्वस्य पक्षतावच्छेदकत्वे गौरवं। अस्मन्मते च ध्वंसे हिंसादिवत्पापविघ्नसाध्याभावानिरापि
न बाधासंभवात् सुद्धजन्यत्वस्य पक्षतावच्छेदकत्वेपि न क्षतिरिति लाघवं॥ एवं ध्वंसे व्यभिचाराभावेन
शुद्धकार्यत्वस्यैव हेतुत्वेन लाघवं॥ न च तत्पापि पक्षतावच्छेदकहेत्वोरैक्येन सिद्धसाधनं दुरुद्धरमिति वा
च्यं॥ व्यतिरेकव्याप्तेरेव प्रकृते गमकत्वांगीकारात्॥ केचित्तु जन्यत्वकार्यत्वयोरभेदेपि जन्यत्वस्य स्वरूप
संबंधविशेषप्रागभावप्रतियोगित्वादिरूपतया नानाविधत्वेनैकविधस्य पक्षतावच्छेदकत्वेऽपरविध
स्य हेतुत्वेन न सिद्धसाधनमित्याहुः॥ अपजनकतायामदृष्टाद्वारकत्वनिवेशोऽशक्यः॥ तथाहि॥ तज्ज
नकादृष्टाजनकत्वे सति तज्जनकत्वमेवादृष्टाद्वारकं तत्तज्जनकत्वं वाच्यं। तथा च बाधः॥ हिंसादिजनकेऽप
रक्तेः। हिंसादिजनकादृष्टस्यापि जनकत्वादिति चेत्। अभिप्रायानवगमात्। स्वजननस्वरूपयोग्या
दृष्टजनकं पथजन्यदेरकूटविशिष्टत्वं पापविध्वस्तिजन्यत्वस्योपदर्शितसाध्यनिष्कर्षात्। स्वपदमेदकू

वा० टप्रतियोगिपरं॥ विशिष्टांतं कृतिविशेषणं भेदप्रतियोगिनीत्यपागादिगोचरास्मदादिकृतितस्याः स्वजननस्व
४ रूपयोग्यादृष्टजनकत्वाजन्यत्वे दकूटवैशिष्ट्यं ईश्वरकृतौ सुलभमिति न बाधः। चतुर्थपाविधभेदकूटस्य दुर्विज्ञेय
त्वात्तद्घटितधर्मेणासाध्यत्वासंभवादुपदर्शितरीतिरसमंजसेति निरसनं॥ कृतौ उपदर्शितयुक्त्या ज्ञानचिकी
र्षासामानाधिकरण्यमपि निवेशनीयं॥ तत्र तत्प्रकारत्वेन विशेषणे गौरवात् लाघवेन स्वजननस्वरूपयोग्य
दृष्टजनकं यद्यजन्यत्वे दकूटविशिष्टसामानाधिकरण्यसंबंधेन ज्ञानचिकीर्षावैशिष्ट्यं कृतौ निवेशनीयं सामाना
धिकरण्ये भेदकूटवैशिष्ट्यं च भेदीयविशेषणतासामानाधिकरण्यीयविशेषणतोभयघटितसामानाधिकर
ण्यं संबंधेन। यद्वा सामानाधिकरण्यसंबंधेन। अत्र प्रथमस्वपदं भेदप्रतियोगि ज्ञानचिकीर्षाविशिष्टापाह
तिस्तद्वत्त्वमेव साध्यं तद्वत्त्वं च स्वजननस्वरूपयोग्यादृष्टजनकं यद्यत्भेदकूटविशिष्टत्वं इति रूपितजन्यतावत्त्वसंबंधे
न। अत्र प्रथमस्वपदं भेदप्रतियोगिपरं द्वितीयस्वपदं कृतिपरं तदपि परिचायकं न तु संबंधघटकं अन्यनि एम०
रूपितजन्यतस्यान्यसंबंधत्वाभावेनादोषात्॥ एवं च प्रकारतया जन्यत्वनिवेशेनापि ज्ञावत्वांतपाच भेदकू ४

रस्यसंबंधघविधयानिवेशेनप्रकारतयाऽनिवेशात्तु उर्वितेपत्तावकाशः अत एव दुःखसंततित्वरसंततमुपेक्ष्य घतेसंत
तित्वात् प्रदीपसंततिवदिति द्रव्यकिरणावलीस्थमहाप्रलयानुमानस्य दुःखत्वं स्वसमानाधिकरणदुःख
प्रागभावाधिकरणक्षणवृत्तिपदार्थभेदकूटवद्ध्वंसप्रतियोगिवृत्तिकार्यवृत्तिधर्मत्वात् प्रदीपत्ववदित्येता
दृशपरिष्कारः प्रकारान्तराभिमतः संगच्छते। तत्रापि स्वसमानाधिकरणदुःखप्रागभावाधिकरणक्ष
णवृत्तिपदार्थभेदकूटविशिष्टत्वनिरूपितप्रतियोगिताश्रयवृत्तित्वसंबंधेन ध्वंसवत्त्वस्यैव साध्यत्वेन भेद
कूटस्य संबंधघटकतयैव निवेशात्। अन्यथा तत्रापि भेदकूटस्य प्रवेशतया तद्घटितस्य साध्यत्वासंभवेन
तादृशपरिष्कारासंगतेरिति। अपि वा स्वसमानाधिकरणदुःखाजनककृतिजन्यत्वं साध्यं एतस्यापि स्वस
मानाधिकरणदुःखजनकपदघटितत्वादिहोक्तरीत्यैव निष्कर्षो बोध्यः। केचित्तु। स्वजनकादृष्टजनकजन्य
कृतस्वकृतिजन्यत्वरूपमदृष्टाद्वारककृतिजन्यत्वं साध्यमित्याहुः॥ वस्तुतस्तु तादृशसंपरासा
धारणजनकतापारेकाभावात् तत्तद्व्यापारान्तरस्य कार्यतिपत्तौ व्यवहितपूर्ववर्त्तित्वं न तज्जनक

वा॰ त्वंगौरवात्॥ किंनुसाध्याहेतुतास्यत्वेतत्कारणतास्यपरंपरास्यत्वेचतद्व्यापारस्यप्रकृतेचकालिकसंबंधेन।
५ कार्यतावच्छिन्नंप्रतिकालिकसंबंधेनकृतेः साध्याहेतुतयाकारणाभिमतकार्यनियताव्यवहितपूर्ववर्त्तित्वा
त्मकसाध्याजनकत्वस्यसाध्यघटकतयायागादिगोचरकृतिमादायोक्तदोषासंभवेनादृष्टाद्वारकत्ववि
शेषणमनुपादेयमेव॥ अत्रघटादेर्दृष्टांतत्वायोगेनचेष्टैवदृष्टांतः॥ नचघटादौव्यभिचारः तस्यापि
पक्षत्वात्। पक्षतातादात्म्यसंबंधेनकार्यतावच्छिन्नंप्रतिसाध्यत्वाख्यविषयतासंबंधेनकृतेर्हेतुतया
साध्यत्वाख्यविषयतासंबंधावच्छिन्नकारणतानिरूपिततादात्म्यसंबंधावच्छिन्नजन्यत्वमेवसाध्यं॥
अन्यत्सर्वंपूर्ववत्॥ पुर्वंचध्वंसेनबाधव्यभिचारसंभावनापि। नचैवंलाघवात्कृतिसाध्यत्वंसाध्यता
ख्यविषयतासंबंधेनकृतिमत्त्वमेववासाध्यमस्त्वितिवाच्यं॥ इष्टत्वात्। एतेनक्षितिसंकुरादिजनकत्वपे
क्षरोपेक्षितिसिद्धावपितस्याः सविषयकत्वेमानाभावः। जीवनयोनिकृतिवन्निर्विषयकत्वस्यापिसं रम॰
भवात्। एवंक्षितिसंकुराद्यव्यवहितपूर्वकालीनयत्किंचिद्गोचरकृतिजन्यत्वमादायार्थांतरमपिदुर्वा ५

रांगं न च तत्कालीनपदार्थांतरमादाय विनिगमनाविरहे पातादृशकृतेर्जनकत्वासंभवात्तद्दोषप्रसक्तिरिति वाच्यं।
कार्यत्वेन कृतित्वेन कार्यकारणभावस्यात्रानुकूलतर्कत्वेन पदार्थांतरमादाय विनिगमनाविरहासंभवा
दिति निरस्तं। साध्यत्वाख्यविषयतासंबंधावच्छिन्नक्षित्यंकुरादिजनककृतपेश्वरीयकृतिसिद्धौ तस्या धर्मि
ग्राहकमानेनैव सविषयकत्वसिद्धेः। यत्किंचिद्गोचरकृतेः क्षित्याद्यविषयकत्वेनार्थांतरस्याप्यभावाच्च।
केचित्तु पक्षेतनत्वहिंस्यादित्यादिश्रुत्या यागादिहिंसारूपक्रियाया मेघेष्टानिष्टसाधनत्वं बोध्यते तत्र च न साक्षा
त्किं त्वदृष्टद्वारेति कल्प्यमानादृष्टसाधनत्वमपि यागादिक्रियायामेव न तु यागादिगोचरकृताव पदृष्टजनक
त्वं यानाभावात् कृतीष्टसाधनतायाविषयत्वस्य निरस्तत्वात्कृत याचयागादिगोचरास्मदादिकृतेः क्षित्या
दिजनकादृष्टजनकत्वाभावेनार्थांतरानवकाशात्तादृशाद्वारकत्वविशेषणानवेशसंभावनापीत्याहुः।
एवं कृतौ ज्ञानचिकीर्षासमानाधिकरणत्वमपि विशेषणं तत्तद्रूपमेव। न च तदनुपादाने दृष्टस्यासिद्धिरि
ति वाच्यं प्रकारांतरेणैवोद्देश्यसिद्धेः॥ तथाहि। उपदर्शितानुमानात्कृतिविशिष्टेश्वरसिद्धावीश्वरकर्तृ

वा० कृतेनवेदस्यप्रामाण्येपसिद्धेप्यासवृत्तिः सर्वविषयस्वज्ञानमयंतपः सोकामयतबहुस्यांप्रजायेयइत्यादिश्रुति
६ वाक्येभ्यः सर्वविषयकत्वानापिसिद्धेः।यत्रप्रकारांतरेणतोद्देश्यसिद्धिस्तत्रैवोपरंजकस्यतापक्वं।अत
एवनचव्यापकेनव्यर्थविषशेषणताबीजाभावादितिपक्षधरमिश्राः।अथतपापिकेवलव्यविजन्य
त्वस्यसाध्यत्वेआदापविनिगमनाविरहइतिचेत्॥विनिगमनाविरहेणत्रितयजन्यत्वस्यैवप्रत्येकंसारध्यत्ता
त्॥अतएवज्ञानेछाकृतीनांधर्मिग्राहकमानसिद्धत्वमपिसंगच्छते प्रत्येकधर्मिग्राहकानुमानेनप्रत्येक
सिद्धेः।किंचकार्यत्वावच्छिन्नंप्रतिज्ञानेच्छयोरजनकत्वात्रविनिगमनाविरहः॥अन्वयव्यतिरेकानुविधा
नाभ्यांकार्यत्वावच्छिन्नंप्रतिकृतित्वेनैवहेतुत्वात्।नचविगमनाविरहस्तानत्वादिनापिहेतुत्वमापास्य
तातिवाच्यं।वृनिष्ठयोः कृत्युपस्थीरणतेनान्यथासिद्धत्वाच्चात्तंप्रेरणाकार्यत्वावच्छिन्नंप्रतिकारणताग्र
हकान्वयव्यतिरेकाभावात्॥नचैवंदंडचक्रादेरपिअन्युपस्थीरणतयाघटादिजनकत्वानुपपत्तिः।एवंया राम०
गादीनामपिअपूर्वोपस्थीरणतयास्वर्गादिजनकत्वानुपपत्तिरितिवाच्यं।दंडचक्रादेर्विरम्यव्यापारोप। ६

घापकत्वात्फलपर्यंतसत्वस्यावश्यकत्वेनविनिगमनाविरहाद्देवतस्यहेः। यागादौनांजनकत्वान्यथानु
पपत्त्यैवापूर्वादिसिद्धोपजीव्यविरोधाद्येनयागाध्वंसपासिद्धसंभवात्। अतएवव्यापारेणव्यापारि
णोनान्यथासिद्धिरितिप्रवादः। प्रकृतेचशाब्दबुद्धिकर्मणांविरम्यव्यापाराभावात्ज्ञानस्येष्टपाइष्टाया
श्चरूसानाशेनफलपर्यंतमसत्वेनउपजीव्याविरोधेतवसत्वानेष्टापोर्हतुत्वासिद्धेः फलताअन्यथासि
द्धत्वात्॥ नचात्राप्युपजीव्यविरोधः॥ ज्ञानजनकत्वानुपपत्त्यानकृतिसाध्यीकारः। प्रत्यक्षेपोवतस्याःसि
द्धत्वात्तस्मात्कृतित्वेनैवकार्यतावच्छिन्नंप्रतिहेतुत्वस्यनिर्दुष्टतयाकृतिजन्यत्वमेवसाध्यमितिसारं।
अपात्रनांतरीयकेशर्करामध्वाद्यस्मिन्नपिष्टभोजनादिकार्येसुखवादैश्चउपदर्शितसाध्याभावेनव्यभि
चारइतिचेन्नतस्यापिपक्षतावच्छेदकाक्रांतत्वेनतत्रसाध्याभावानिर्णयात्। साध्याभावांशेनिर्णयात्म
कस्यैवतद्वृत्तित्वांशेसंशयपनिश्चयसाधारणस्यव्यभिचारज्ञानस्यव्याप्तिग्रहप्रतिबंधकत्वात्।
अपसाध्याभावांशेसंशयात्मकस्यापिव्यभिचारज्ञानस्यव्याप्तिग्रहप्रतिबंधकत्वमावश्यकं॥ कथम

वा॰ म्यपाकरवह्निसंयोगः प्रत्यक्षविषयसंयोगधर्मातिरिक्तधर्मवान्समवायित्वात् घटवदित्यनुमानात्तच्छक्तिसि-
७ द्धिः। तत्र कापि हेतुमन्निष्ठसाध्याभावानिश्चयेन व्याप्तिग्रहसंभवात् मन्मते च न तत्र पक्षे साध्यसंदेहे तत्पक्षम-
न्तर्भाव्यैव साध्याभावांशे संशयात्मकव्यभिचारज्ञानसत्त्वात्तत्र व्याप्तिग्रहासंभवः। तथैवं पक्षमन्तर्भाव्य
व्यभिचारसंदेहस्य व्याप्तिग्रहप्रतिबंधकत्वेऽनुमानमात्रोच्छेदः सर्वत्र पक्षमेतमन्तर्भाव्य व्यभिचारसंदेहसं-
भवादिति वाच्यं॥ अनुकूलतर्काधिरहविशिष्टस्यैव व्यभिचारज्ञानस्य व्याप्तिग्रहप्रतिबंधकत्वात्तत्र कार्य-
कारणभावाद्यनुकूलतर्कसत्त्वेनादोषादिति चेत्तर्हि प्रकृतेऽपि कार्यत्वावच्छिन्नं प्रति कृतित्वेन कार्यकार-
णभावरूपानुकूलतर्कसत्त्वेन व्याप्तिग्रहसंभवेनादोषात्। अथ कुलालादिकर्तृकघटादीनामपि पक्ष-
तावच्छेदकाक्रांतत्वेनेश्वरकर्तृकत्वसिद्धौ तेषामुभयकर्तृकत्वापत्तिरिति चेन्न प्रासादस्य तत्तशिलोद्धर-
णादिकार्याणां साधारणसाधारणानेककर्तृकत्ववत्तेषां साधारणासाधारणोभयकर्तृकत्वे बाध- रम॰
काभावेनेष्टापत्तेः। इयान् परं विशेषः। यत्प्रासादादीनामनेककर्तृकत्वं प्रत्यक्षगम्यं घटादीनां च ७

कुलालनादिकर्तृकत्वं प्रत्यक्षगम्यमीश्वरकर्तृकत्वं चानुमानगम्यमिति। नहि कार्याणामेकजातीयप्रमा
णगम्यकारणताकसामग्रीजन्यत्वमिति नियमः मानाभावात्‌ विजातीयप्रमाणगम्यकारणताकसा
माम्यविशेषकारणकाव्लदंडादिजन्येषु घटादिष्वेव व्यभिचाराच्च। ननु तथापि जन्यकृत्यजन्यशरीराजन्य
त्वादिसाधिप्रत्यनुमानेन सत्प्रतिपक्षसंभवात्प्रोक्तानुमानेन जन्यमात्रे कृतिजन्यत्वासिद्धिः। नच प्रत्यनुमा
नेजन्यत्वसामानाधिकरण्येन पक्षत्वे सत्प्रतिपक्षासंभवः जन्यत्वावच्छेदेन पक्षत्वे च घटादौ हेतुत्वसत्वे
नभागासिद्धिरिति वाच्यं॥ अनुमानेऽवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतयावच्छेदकावच्छेदेन विशि
ष्टबुद्धेः सामानाधिकरण्येनापि तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकतया प्रत्यनुमाने सामानाधि
करण्येन पक्षतायामपि सत्प्रतिपक्षसंभवात्‌। नचाजन्यत्वमात्रस्यैव कृतिजन्यत्वाभावव्याप्यत्वसं
भवेन शरीरविशेषणस्य व्यभिचारावारकत्वेन व्यर्थतया नीजक्ष्मादेरिव शरीराजन्यत्वस्य व्याप्य
त्वासिद्धतया सत्प्रतिपक्षासंभव इति वाच्यं। अधिकोक्त्याव्यर्थविशेषणत्वस्य निग्रहस्थानमात्रसं

वा॰ पादकतयानीलधूमादौव्यर्थविशेषणत्वसत्वेपिव्याप्तिसत्वेनव्याप्यत्वासिद्ध्यभावात्। नचधूमसमानाधि
८ करणाभावप्रतियोगितावच्छेदकत्वतापेक्षयानीलधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत
स्यगुरुतयाकथंतदवच्छिन्नप्रतियोगिताकाभावघटितव्याप्तिसत्वमितिवाच्यं। गौरवप्रतिसंधानदशाया
मपिकंबुग्रीवादिमात्रास्तीत्यादिप्रतीत्युदयेनविशिष्टसत्तादेर्व्याप्यताव्यापकतायाश्चगुरुधर्मस्याप्य
भावप्रतियोगितावच्छेदकत्वांगीकारात्। नीलधूमत्वघटितनिरुक्तावच्छेदकत्वस्यप्रइधूमत्वघ
टितावच्छेदकत्वासमनैयत्याच्च अतएवदीधितिकारस्यापिनीलधूमत्वादेर्वीरणीयत्वेपितुशाब्दोक्ता।
नीलधूमादेर्व्याप्यत्वंसंमतमितिचेन्न। प्रकृतानुमानस्यानुकूलतर्काभावेनाप्रयोजकतयाऽजन्यत्वरूपोपा
धिमत्तयाचदुर्बलत्वेनानुमानस्यनुकार्यत्वावच्छिन्नंप्रतिकृतित्वेनकार्यकारणभावरूपानुकूलतर्कस
त्वेनबलवत्तयासत्प्रतिपक्षासंभवात्। एतेनोक्तानुमानेशरीरिकर्तृकत्वंशरीरजन्यत्वंचोपाधिः। नचत रम॰
स्यप्तिसंकुरादौसाध्यव्यापकतासंदेहान्नोपाधित्वमितिवाच्यं। तावतानिश्चितोपाधित्वाभावेपिसंदिग्धो ८

पाधित्वेबाधकाभावात् तथा च तद्धि तद्व्यभिचारसंशयेन व्याप्तिग्रहप्रतिबंधात् कथमनुमानमित्यपि
निरस्तं। पूर्वोपदर्शितरीत्यानुकूलतर्कविरहविशिष्टस्यैव व्यभिचारज्ञानस्य प्रतिबंधकतया प्रकृते चोक्त
कार्यकारणभावरूपानुकूलतर्कसत्त्वेनतद्दोषात् अनुकूलतर्केण कार्यत्वरूपहेतोः कृतिजन्यत्वरूपसा
ध्यव्याप्यत्वनिर्णये साध्यव्याप्यहेतुव्यापकत्वेन साध्याव्यापकमानेन साध्यव्यापकत्वाभावनिर्णये नो
पाधितासंभवात्। अत्रेदं बोध्यं उक्तमानेनैव कृतेरेकत्वे नित्यत्वे च लाघवमिति लाघवज्ञानसहकारे
णकृतावेकत्वनित्यत्वे अपि सिध्यतः। लाघवज्ञानसहकारेण व्यापकतानवच्छेदकरूपस्यापनुमितौ भा
नात्। एवं श्रुतिर्हि सिद्धसर्वविषयकेच्छाज्ञानेच्छयोरप्येकत्वनित्यत्वे लाघवादेव सिध्यतः। तयोर्नानात्वे
उत्पत्तिविनाशकल्पनेच गौरवात्। न चैवमपि तद्ज्ञानादीनां सर्वविषयकत्वासिद्धिः। नित्यत्वेनैव तत्सि
द्धेः। ज्ञानादेर्नियतविषयकत्वस्य कारणाधीनत्वेन कारणाभावेन नियतविषयकत्वाभावात् वत्त
त्सविषयकत्वमेवमानाभाव इति वाच्यं। कार्यकारणभावबलेनैव तत्सिद्धेः। अस्मदादिज्ञाने प्रत्यक्ष

वा०
९

सिद्धस्य सर्वेपि धर्मिवत्कत्वस्य ज्ञानत्वादिना तत्रानुमा वाच्या।। एवमुक्तानुमानेन नित्यैककृतिसिद्धो नत्यां कृतित्वे
न विशेषगुणत्वसिद्धो स्वात्कृनिरस्मदाद्यसमवेता नित्यैकविशेषगुणत्वाद्यतिरेकेऽस्मदादिज्ञानवदित्यनुमा
नेन तत्सामस्यपद्यसमवेतत्वसिद्धावस्मदाद्यसमवेतात्मकृतिरात्मसमवेता कृतित्वादस्मदीयकृतिवदि
त्यनुमानेन तादृशकृतिमत एकत्वे नित्यत्वे च लाघवमिति लाघवज्ञानसहकृतेनास्मदाद्यतिरिक्तस्य
तादृशकृतिमतो नित्यैकस्येश्वरात्मनः सिद्धिः। आत्मत्वादेव चतस्य व्यापकत्वमपि सिद्ध्यति। अत्रोक्त
युक्त्यैवैकत्वादिसिद्धिः।। किंतु श्रुतितोपि। तथाहि।। एकमेवाद्वितीयं ब्रह्मेति सविश्वकृद्विश्वविदात्मयो
निः सर्वगो भुवनस्यास्य गोप्तेति। अत्र विश्वकृदित्यनेन सर्वविषयककृतिमत्त्वं विश्वविदित्यनेन सर्ववि
षयकज्ञानवत्त्वं। सर्वग इत्यनेन व्यापकत्वं सिद्धं। स्वाभाविकी ज्ञानबलक्रिया चेति। अत्र ज्ञानस्य स्वाभावि
कत्वोक्त्या नित्यत्वं। एवं नित्यं विज्ञानवत्त्वं। सर्वग इत्यनेन व्यापकत्वं सिद्धं। स्वाभाविकी ज्ञानबलक्रिया राम०
चेति। अत्र ज्ञानस्य स्वाभाविकत्वोक्त्या नित्यत्वं। एवं नित्यं विज्ञानमानन्दं ब्रह्मेति। अत्र ज्ञानविशिष्टस्य नि ९

सत्वप्रतिपादनेनविशेषणस्यस्तानस्यापिनित्यत्वंलभ्यते।नचैवमानंदविशिष्टस्यनित्यसत्वप्रतिपादनेनेश्वरेनि
त्यसुखस्यापिसिद्धिःस्यादितिवाच्यं।इष्टत्वात्।एवंविश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्व
तस्पात्।संबाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवएकइति।विश्वतश्चक्षुः।विश्वविषयकसाक्षात्का
रवानित्यर्थः।विश्वतोमुखः विश्वविषयकवचनवानित्यर्थः।विश्वतोबाहुःविश्वविषयकप्रयत्नवानि
त्यर्थः विश्वतः स्पात्·विश्वतः स्पात्·विश्वव्यापकइत्यर्थः।बा— भ्यांधर्माधर्माभ्यां।अनेनादृष्टस्यसह
कारित्वमुक्तं।पतत्रैः परमाणुभिः संधमतीतियोजनात्।तौपादिहितौपादौतेन परमाणून्संयोजयतीत्य
र्थः।किमर्थमित्यतआह द्यावाभूमीजनयन्निति।द्यावेत्यनेनोर्ध्वलोकसमष्टिः।भूमीत्यनेनाधोलोक
समष्टिरुपलक्षितं।एकं संपदं धमतीत्यनेनान्वितं।द्वितीयंजनयन्नित्यनेनान्वितं व्यवहितान्वयेतिद्व
द्वामस्तुत्रात्· तयाच द्यावाभूमीचतुर्दशलोकानांसंग्रहः तत्तत्स्थानविशेषविशिष्टतयाजनयन्नित्य
र्थः।आरंभवादोप्यतच्छ्रुतिमूलकएव।अत्रारंभवादप्रतिपादनात्।अत्रश्रुत्यंतरमपि।आदिःससंयोगनिमि

त्वहेतुः परात्रिकात्वाद परोपि द्व्यणुकेति संयोगः एषोपि व्यादिचतुर्विधपरमाणूनां संयोगः ते प्रति निमित्तहेतु नि
मित्तकारणमित्यर्थः॥ एवं छांदोग्ये श्वेतकेतुं प्रत्युद्दालक आह। न्यग्रोधफलमत आहरेति इदं भगवइति भि
न्धीति भिन्नं भगवइति किमत्र पश्यसीति अण्व्य इवेमा धाना भगवइति आसामंगैकां भिंधीति भिन्ना भ
गवइति किमत्र पश्यसीति न किंचन भगवइति तं होवाच यं वै सोम्यैतमणिमानं न निभालयसे एतस्य वै
सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठतीति अत्रारंभवादः प्रतीयते। तथाहि। पूर्वं सन्मूलाः सोम्ये
माः सर्वाः प्रजा इत्यनेन कार्यमात्रे ईश्वरस्य कारणत्वमुक्तं अत्रेश्वरस्य निमित्तकारणत्वमेतन्न तु समवा
यिकारणत्वमित्याह न्यग्रोधफलमित्यादि। अतः ब्रह्माल्लू आहर आनय इदं भगवइति श्वेतकेतोरुक्तिः
इदं आनीतं भगव्ये भगवत्रिव्यर्थः मनुष्य सोऽरुः संबुद्धोक्तं रसीतिहत्वं। यं वै सोम्येतं अणिमानं परमा
णुं न निभालयसे न चाक्षुषविषयं करोषि। एतस्येति परमाणुत्वेनैकत्वेन वा चेतनस्समुदाये द्व्यणुकादि प
र परमामहतो न्यग्रोधस्यारंभः अतस्तेषामेव समवायिकारणत्वं न त्वीश्वरस्य तस्य तु निमित्तकारण

त्वमेवेति सद्वृत्तं न्यग्रोधपदं कार्यमात्रपरेन त्वात्राणिमपदं ईश्वरपरं दुर्विज्ञेयत्वरूपसूक्ष्मत्वस्य तत्रापि संभवात्।
एषोऽणुरात्मा चेतसा वेदितव्य इत्यादावणुशब्दस्येक्ष्मसूक्ष्मार्थकत्वस्य सर्वैरंगीकारादिति परे यां मतं त
युक्तं। तत्रागत्या परमाणुशब्दस्य लक्षणया उक्तार्थकत्वेऽपि प्रकृते मुख्यबाधकाभावेन लक्षणाया अ
योगात्। न च तथापि एतच्छ्रुतिपूर्वश्रुतौ संपश्योरणिमेत्यत्राणिमपदस्येश्वरार्थकतयाऽत्रापि ईश्व
रपरत्वं युक्तमिति वाच्यं। एतमणिमानमित्यनेन स्थूलावयवविभागाजरावस्थितस्य सूक्ष्मावयवस्ये
वमक्तात्तत्पश्चानुसंधेयाः। नन्वीश्वरे तज्ज्ञानादौ चैकमेकत्वं न तावत्संख्याश्रयावर्त्तकत्वात् ज्ञानादौ सं
ख्याद्यपाद्वपरंपरया वृत्तित्वाविरोधित्वात्। नापि स्वसमानजातीयद्वितीयरहितत्वं। तस्य सिद्ध्यसिद्धि
पराहतत्वात्। न च स्वसमानजातीयद्वितीयसहितेषु घटत्वमेदकूटवत्त्वं तदितरो भोक्तृदोषः इति वाच्यं।
भेदकूटस्य दुर्ग्रहत्वात्। अथ नित्यज्ञानादिमत्प्रतियोगिभेदाप्रतियोगित्वमीश्वरे एकत्वं। तद्धि ज्ञानादौ च नित्य
ज्ञानादिमत्प्रतियोगिभेदप्रतियोगितानवच्छेदकत्वं। स्वेतरज्ञानाद्यवृत्तिनित्यत्ववत्त्वं वा। आद्ये प्रतियो

वा० गीतायांव्यासज्यवृत्तिधर्मानवच्छिन्नत्वंनातः उभयमेदघादायासंभवइतिचेन्ननित्यज्ञानादिसिद्धेः पूर्वमित्ता
११ द्येकत्वज्ञानासंभवेनोक्तरीत्याज्ञायघटज्ञानसहकारेणानुमितेर्नोत्तद्वैशिष्ट्यज्ञानासंभवात्। विशिष्टबुद्धौ
विशेषणज्ञानस्यहेतुत्वात्। यत्तुसामान्यतोविशिष्टबुद्धित्वावच्छिन्नंप्रतिविशेषणज्ञानत्वेननहेतुता
विशिष्टबुद्धित्वादेरनुगतस्याभावात् किंतुकदाचित्स्वरूपतोघटत्वादिविशिष्टबुद्धित्वादेरनुगतस्याभाव
त् किंतुकदाचित्स्वरूपतोघटत्वादिविशिष्टबुद्धिंप्रत्येकदाचिज्जातित्वादिनेतिनियमनिर्वाहः एवंस्वरू
पतोघटत्वादिविशिष्टबुद्धिंप्रतिस्वरूपतोघटत्वादिज्ञानत्वेनजातित्वादिनातद्विशिष्टबुद्धिंप्रतिजाति
त्वादिनातज्ज्ञानत्वेनहेतुता। कल्प्यतेननुजात्यतिरिक्तपदार्थमंतर्भाव्यापितथाहेतुत्वंकल्प्यं· तत्प्रमाणा
भावात्· एवंचप्रकृतेएकत्वविशिष्टबुद्धिंप्रतिएकत्वज्ञानहेतुत्वस्याभावेनैकत्वज्ञानंविनाप्युक्तरीत्यै
कत्वविशिष्टानुमितिसंभवेनतोक्तदोषइतिचेन्न उक्तरीत्याविशिष्टबुद्धिविशेषणज्ञानयोर्घटत्वपट ए०
त्वादिभेदेनानंत्येहेतुहेतुमद्भावकल्पनेगौरवेणलाघवात्त्रिरवच्छिन्नप्रकारतासंबंधेनज्ञानंप्रतिनि ११

रवच्छिन्नविषयतासंबंधेनसावच्छिन्नप्रकारतासंबंधेनज्ञानंप्रतिसावच्छिन्नविषयतासंबंधेनज्ञानत्वे
नहेतुत्वलघुपकल्पनस्यैवोचितत्वेनैकत्वज्ञानंविनातद्विशिष्टानुमितेर्लक्षणेपिदुरुपपादत्वादितिचेन्न
अत्राहुः।आत्मानात्मोभयावृत्तिद्रव्यासमानाधिकरणद्वित्वशून्यत्वमीश्वरैकत्वंतादृशद्वित्वासमा
नाधिकरणद्वित्वशून्यत्वंचतज्ज्ञानाधेकत्वं।एतादृशैकत्वंचानित्यज्ञानादिसिद्धः पूर्वगुणदोषसंग्रहंअवृ
त्तितमसमानाधिकरणंतचक्रमेणेश्वरघटादिद्वित्वमीश्वरजीवद्वित्वंचादायासंभववारणाय।तादृ
शंचघटपटादिद्वित्वमेवप्रसिद्धमिति॥तद्भिन्नंयएतादृशैकत्वस्यजीवात्मसाधारण्येनद्वित्वाविरोधित्वा
त्।वस्तुतस्तुस्वसामानाधिकरण्यस्वव्यधिकरण्योभयसंबंधेनात्मत्वविशिष्टत्वेसतिस्वावच्छिन्नसामा
नाधिकरण्यस्वावच्छिन्नवैयधिकरण्योभयसंबंधेनद्रव्यत्वविशिष्टंयत्तद्वित्वंसमवायेनतच्छून्यत्वमी
श्वरैकत्वं।सामानाधिकरण्येनतच्छून्यत्वंचतत् —नाधिकत्वमितितत्त्वं॥नन्वेवंजन्यंशरीरजन्यंकार्य
त्वाद्घटादिवदित्यनुमानेनक्षित्यंकुरादिजनकशरीरासिद्धावीश्वरस्यशरीरित्वापत्तिः नचाप्रयोज

वा० कर्तृत्वविशिष्टघटत्वपटत्वाद्यवच्छिन्नंप्रत्येवस्वप्रयोज्यविजातीयसंयोगसंबंधेनकुलालादिशरीरत्वेन
१२ हेतुतयाकार्यत्वावच्छिन्नंप्रतिशरीरत्वेनहेतुत्वाभावादितिवाच्यं।तुल्ययुक्त्याकृतित्वेनकार्यत्वावच्छिन्नंप्र
तिहेतुत्वसिद्ध्योक्तरीत्येश्वरसिद्ध्यनापत्तेः।यदिचविशिष्टघटपटादिभेदेनानंतकुलालादिकृतिहेतुत्वे
गौरवात्कृतलाघवेनकार्यत्वावच्छिन्नंप्रतिहेतुत्वंकल्प्यते।शरीरलाघवमपेक्ष्यसंख्याकृतलाघवस्यबलव
त्त्वात्।नचैतादृशहेतुत्वस्वीकारेक्षित्यादिकर्तृत्वेनेश्वरस्यतद्वृत्तानेच्छाकृतीनामीश्वरेचानंतमूर्त्तसंयोगा
नांकल्पनेगौरवमितिवाच्यं।तादृशगौरवस्यफलमुखत्वेनादोषत्वादितिविभाव्यतेतदाप्रकृतेपितुल्यमिति
चेत्।ईश्वरेशरीराभावबोधकेनापाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णइत्यादिश्रुतिसहकृ
तेनशरीरनियतभोगाभावेनचशरीराभावसिद्धौबाधेनेश्वरशरीरसिद्ध्यसंभवात्।ईश्वरशरीराभाव
सिद्धौक्षित्यंकुरादौव्यभिचारेणांगस्यघटत्वपटत्वाद्यवच्छिन्नंप्रत्येवतत्तच्छरीरत्वेनहेतुतयाकार्यत्वाव एम०
च्छिन्नंप्रतिशरीरत्वेनहेतुत्वस्यासिद्ध्याउक्तानुमानस्याप्रयोजकत्वाच्च।ईश्वरसाधकपूर्वोपदर्शितानुमाने १२

तुनकोपिदोषः क्वापिव्यभिचारानिरूपणेनलाघवात्कार्यत्वावछिन्नंप्रतिकृतित्वेनहेतुत्वसिद्धावप्रयोजक
त्वाभावात्व्यथाघभावाद्या।नचैवंकार्यत्वावछिन्नंप्रतिचेष्टात्वेनहेतुत्वमपिनस्यात्।शरीराभावेचेष्टाया
असंभवेनक्षित्यंकुरादावेवव्यभिचारादितिवाच्यं।आगमाघटत्वपटत्वाद्यवछिन्नंप्रतिकुलालत्वादिचेष्टा
याविजातीयचेष्टात्वेनहेतुत्वाभ्युपगमेनतादृशहेतुताभावेक्षतिविरहात्।नचघटत्वाद्यवछिन्नंप्रत्यपि
चेष्टाशरीरयोःकथंहेतुत्वंसर्गाद्यकालीनघटादौव्यभिचारादितिवाच्यं।विजातीयघटत्वाद्यवछिन्नंप्र
त्येवस्वप्रयोज्यविजातीयसंयोगसंबंधेनतयोर्हेतुतात्।यत्तुअग्रएषादोषोकुकूलादिकेदृष्टेतत्कर्तुरदर्शनेच
दृष्टंतु – दिकंकेनचिच्छरीरिणाकृतमित्यनुमीयतेनत्वंकुरपर्वतादावित्यनुभवसिद्धमितिशरीरिकर्तृक
ककार्यत्वम्महेशरीरिकर्तृकत्वानुमापकः कश्चनधर्मोविलक्षणोऽवश्यमुपेयः सचधर्मोजातिरूपउपा
धिर्वेत्यन्यदेतत्।एवंचतादृशधर्मएवचेष्टाशरीरयोर्जन्यतावच्छेदकः।तावतैवक्षितिसंकुरादौव्यभिचा
राणात्।नचैवंलाघवात्कार्यत्वावछिन्नंप्रतिकृतित्वेनहेतुत्वानुपपत्तिः।तत्रतादृशधर्मविशेषस्यजन्यता

वच्छेदकत्वेपिलाघवान्नापादितिवाच्यं। कार्यत्वस्यसंग्राहकत्वेनतस्यैवजन्यतावच्छेदकत्वेसंभवतितत्यागानौ
चित्यात्। लाघवेनेश्वपिसंग्राहकत्वलाघवस्यबलवत्वादिति। तत्र। तादृशविलक्षणधर्मेमानाभावात्। नच
तादृशधर्माभावेकथंशरीरिकर्तृकत्वानुमानमितिवाच्यं। जुहूत्वादिनैवतदनुमानात्। नचाप्रयोजकत्वं।
निरुपाधिसहचारस्यैवानुकूलतर्कत्वात्॥ एतेनजुहूत्वादिनेवांकुरत्वादिनापितदनुमानापत्तिरित्यपिनि
रस्तं। अंकुरत्वादौतत्सहचाराग्रहात्। नचतन्निरुपाधिसहचारस्यानुकूलतर्कत्वेमानाभावइतिवाच्यं। जात्या
दिनासजात्याद्यनुमानान्यथानुपपत्तेरेवमानत्वादितिसांप्रदायिकाः। नवीनास्तु अपाणिपादइत्यादिश्रुती
नामस्मदादिशरीरसंस्थानतुल्यसंस्थानशरीराभावमात्रबोधकत्वेनभोगस्यशरीरनियतत्वेमानाभा
वेनचेश्वरेशरीराभावास्तित्वाबाधाभावेनक्षित्यंकुरादौव्यभिचारानिर्णयेनकृतेरिवचेष्टाशरीरयोरपि
लाघवात्कार्यत्वावच्छिन्नंप्रत्येवहेतुतया। प्रयोजकत्वाभावेनचोक्तानुमानादीश्वरशरीरसिद्धेर्बाधकाभा
वेनेश्वरस्यशरीरित्वमिष्टमेव। अतएवेश्वरोक्तत्वेनवेदप्रामाण्यसिद्धिःस्वरसतएवसंगच्छते। अन्यथेश्वर

स्यशरीराभावेवक्तृत्वासंभवेनवेदप्रामाण्यस्यभृतत्वेशब्दापाद्यनुत्तरेराद्गेशसाध्यतापत्तेः।तच्चशरीरं
नित्यंलाघवात्।नचेश्वरस्यशरीरित्वेतज्ज्ञानादीनांजन्यत्वापत्तिः।तत्कारणशरीरादेःसंभवादितिवाच्यं।
लाघवादेवतेषांनित्यत्वसिद्धेः।नचैवंतच्चेष्टाया अपिनित्यत्वापत्तिः इष्टत्वात्।नचैवंज्ञानत्वादेर्नित्यसाधा
रणत्वेनशरीरादिजन्यत्वावच्छेदकत्वानुपपत्तिर्जन्यत्वादेर्निवेशेचगौरवमितिवाच्यं।तस्यफलमुखत्वेना
दोषत्वात्।नित्यसाधारणधर्मस्यापिकार्यतावच्छेदकत्वेबाधकाभावाच्च।अथेश्वरस्यस्थूलशरीरां
गीकारेतस्यपाषाणमध्यवर्त्तिकीटशरीरः कर्तृत्वानुपपत्तिः।तत्राभग्नस्यस्थूलशरीरस्यप्रवेशासंभ
वात्।अणुशरीराभ्युपगमेचसकलकार्यकर्तृत्वानुपपत्तिरितिचेन्न।तस्याचिंत्यानुपमशक्तिकत्वेनाभ
ग्नस्यापितच्छरीरस्यपाषाणादौप्रवेशसंभवात्।नानाऽणुशरीराभ्युपगमाद्वा।यद्वापरमाणवएवप्र
सत्यवदीश्वरात्मसंयोगजन्यचेष्टावंतःईश्वरस्यनित्यानिशरीराणि।नचैवंचेष्टाया अनित्यत्वेसर्वदाऽ
संभवइतिवाच्यं।अतिसत्चेष्टाया अपिसर्वदासंभवात्।नचपरमाणूनांचेष्टांवदंत्यावयवित्वहपशरी

वी० रत्वासंभवइतिवाच्यं। चेष्टाजनकतावच्छेदकजातिविशेषस्यैवशरीरत्वरूपत्वात्। नचतेनरूपत्वादिनासांकर्यात्क
१४ र्ष्यं शरीरत्वस्यजातिरूपत्वेनेतिवाच्यं। उपाधिसांकर्यस्येवजातिसांकर्यस्यापिप्रमाणाभावेनादोषत्वात्। नच
चेष्टात्वस्यानुगतस्याभावात्कथं तदवच्छिन्नजनकतावच्छेदकत्वं शरीरत्वस्येति वाच्यं। तस्यापिप्रयत्नजन्य
तावच्छेदकशरीरक्रियाविशेषगतजातिविशेषरूपत्वात्। वस्तुतस्तुईश्वरप्रयत्नाधीनचेष्टावत्त्वं सर्वे
षामेवेश्वरशरीरत्वं। अतएवसहस्रशीर्षापुरुषः सहस्राक्षःसहस्रपादित्यादिश्रुतयोप्युपपन्नाः सर्वभूता
नीत्यादिस्मृतयश्चसाधुसंगच्छंते। यत्तुशरीरेणचेष्टामुत्पादयतामात्मनांकार्यत्वावच्छिन्नंप्रतिचेष्टात्वे
नहेतुत्वस्यावश्यकत्वेनचेष्टोपहितेस्यशरीरस्यकार्यत्वावच्छिन्नंप्रतिहेतुत्वासिध्योक्तशरीरजन्यत्वानु
मानात्रेश्वरशरीरसिद्धिः संभवतीतितन्न। तथापिचेष्टाजन्यत्वानुमानेनैवक्षित्यंकुरादिजनकचेष्टासि
द्धौतज्जनकतयेश्वरकृतिशरीरयोःसिद्धौ शरीरीश्वरसिद्धेरावश्यकत्वात्। नचैवमनंतशरीरकल्प एम०
नागौरवेणलाघवात्कार्यत्वावच्छिन्नंप्रतिचेष्टायाअपिहेतुत्वासिद्ध्याकथमीश्वरशरीरसिद्धिरितिवाच्यं। १४

तादृशगौरवस्य फलमुखत्वेनादोषत्वात्। अयत्नपाधिचेष्टायाः घटादौ स्वप्रयोज्यविजातीयसंयोगसंबं
धेन तत्कृत्यादौ च स्वप्रयोज्यविजातीयसंयोगध्वंसादिसंबंधेन हेतुतयाऽनुगतसंबंधाभावात् कथं का
र्यतावच्छेदकप्रतिहेतुत्वमिति चेन्न। संबंधाननुगमस्यादोषत्वेन सर्वत्र स्वप्रयोज्यध्वंसवत्त्वसंबंधे
नैव चेष्टायां हेतुत्वाभ्युपगमेन वाऽदोषात् प्रतिक्षणं किंचिद्धि नश्यति। तन्नियमेन तद्विनाशस्य चान
न्तर्भावे चेष्टाप्रयोज्यत्वेन क्वापि व्यभिचाराभावात्। अत एव रामैकसर्गादिशरीरे चेष्टाविशेषहेतुत्वस्याप्र
यत्नेनापीश्वरसिद्धिर्बोध्या। अपि समवायेन नानाविधविजातीयचेष्टायामवच्छेदकतया नानाविधकृ
तेर्हेतुतयैकविधनित्यकृतेस्तद्धेतुत्वासंभवात्। न चैकस्या अपि नित्यकृतेर्नानाशरीरावच्छिन्नत्वोप
गमेन नानाशरीरवृत्तिनानाविधविजातीयचेष्टाहेतुत्वे बाधकाभाव इति वाच्यं॥ तथा सति नाना
विधविजातीयचेष्टापादेशनियमानुपपत्तेरिति चेन्न। समवायेन विजातीयतत्तच्चेष्टां प्रति स्वीयवि
जातीयतत्तच्चेष्टावृत्तिप्रकारतानिरूपितविशेष्यतासंबंधेन स्वीयविजातीयतत्तच्चेष्टावृत्तिस

वा॰ ध्वतारव्यविषयतानिरूपितोपादानतारव्यविषयतासंबंधेन वा एकस्यापबलकृतेर्हि तुल्येपि देशनियमोपपत्तेः
१५ ॥ नैवमपि कृतेर्निसत्तयाचेष्टाया कालनियमासंभवइतिवाच्यं । समवायेन तत्तत्कालीनविजातीयत
त्वेष्टांप्रतिस्वीयतत्कालीनविजातीयतत्तच्चेष्टावृत्तित्वघटितोपदर्शितसंबंधेन कृतेर्हि तुल्योपगमेने
ष्ययाः कालनियमस्याप्युपपत्तेः ॥ नैवंदेहधितिकारस्यनिरासंगुल्यवच्छेदेन नानाचेष्टानुरोधेन विं
शतिप्रयत्नस्वीकारस्यासंगततापत्तेः ॥ उक्तरीत्यातत्राप्येकेनैवप्रयत्नेन नानाचेष्टोपपादनस्यसंभवादि
तिवाच्यं । तावताप्यतैरभावात् । नैवंजीवात्मनिकृत्संगीकारोव्यर्थः ॥ अस्मदादिशरीरचेष्टायाअपीश्वर
कृत्सेवसंभवादितिवाच्यं । घटंकरोमीत्यादिप्रत्ययबलादेवतदंगीकारात् ॥ नैवमपिजीवनयोनिकृ
तिकापूर्त्यपीश्वरकृत्सैवनिर्वाहेतदंगीकारोव्यर्थः स्यादितिवाच्यं । इष्टापत्तेरितिवदंति ॥ स्यादेतत् । कार्यत्वा
वच्छिन्नप्रतिकृतित्वादिनासामान्यहेतुत्वेलाघवाभावात् । नचयद्विशेषयोः कार्यकारणभावोऽस्ति एम॰
बाधकेनतत्सामान्ययोरपीतिन्यायेनतत्सिद्धिः अन्यथासर्वत्रसामान्यकार्यकारणभावमात्रस्योच्छे १५

संगादितिवाच्यं।कार्यत्वस्यानुगतस्यदुर्वचत्वात्तादृशसामान्यहेतुत्वस्यासंभवदुक्तिकत्वात्।नचप्राग
भावप्रतियोगित्वमेवतदितियुक्तं॥प्रतियोगित्वस्यस्वरूपसंबंधात्मकतयातत्तत्प्रतियोगिरूपत्वे
नाननुगमात्॥नचस्वाश्रयप्रतियोगित्वसंबंधेनप्रागभावत्ववत्त्वमेवकार्यत्वमप्यविषयतादिव
दतिरिक्तमेवप्रतियोगित्वमंगीकार्यमतोनोक्तदोषइतिवाच्यंप्रागभावत्वस्यदुर्वचत्वात्॥नचध्वंस
प्रतियोग्यभाववत्त्वंप्रागभावत्वमितिवाच्यं।ध्वंसत्वस्यप्रागभावप्रतियोग्यभाववत्त्वरूपतयाऽन्योन्याश्र
यात्॥नचध्वंसत्वप्रागभावत्वयोरखंडोपाधित्वान्नदोषः।प्रागभावानंगीकारेतथाप्यनिस्तारात्।
ध्वंसप्रतियोगित्वस्यध्वंसावृत्तित्वेनतस्याधिकार्यत्वरूपत्वासंभवात्।नचोत्पत्तिमत्त्वमेवकार्यत्वंउ
त्पत्तेरतींद्रियतयालौकिकप्रत्यक्षाभावेप्यलौकिकप्रत्यक्षत्वानपायादितिवाच्यं।आद्यक्षणसंबं
धरूपायास्तस्याअप्यननुगमात्।अतएवनस्वरूपसंबंधविशेषोपीति।मेचां।उत्पत्तिमत्त्वस्यैवका
र्यत्वरूपत्वसंभवात्।नचाननुगमः।स्वाधिकरणसमयध्वंसवत्त्वसंबंधावच्छिन्नस्वनिष्ठप्रतियोगि

वा॰ ताकाभाववत्वावच्छिन्नकालिकविशेषणतासंबंधेनवृत्तित्वरूपस्य तस्यानुगतत्वात्। अत्र च स्वरूपसत्
१९ स्यपरत्वात्॥ विषयतात्वादिवत्कार्यत्वस्याप्यतिरिक्तत्वेनादोषाच्च॥ अत्र केचित्। कार्यत्वावच्छिन्नंप्र
तिकृतित्वादिनासामान्यहेतुत्वाभावेपिनक्षतिः। पीलुपाकवादिवैशेषिकमतेपाकजघटादौखंडघ
टादौसर्गाद्यकालीनघटादौचकुलालादिकृतिजन्यत्वबाधेनघटत्वादिहेतुताकृतिजन्यत्वसाधनेन
तमेतेनशपाद्यशरीरीश्वरसिद्धेर्निष्प्रत्यूहत्वाद्विशेषहेतुत्वस्यैवानुकूलतर्कत्वात्। यत्तुकुलाला
दिकृतेः स्वप्रयोज्यविजातीयसंयोगीयकालिकविशेषणतासंबंधेनकार्यत्वविशिष्टप्रत्यासत्त्याहेतुत्वेनन
तत्रकुलालादिकृतिजन्यत्वबाधः पाकजघटादिस्थलेऽग्निनाशकेनपरमाणुद्वयसंयोगध्वंसानामुत्तरतादृ
शसंयोगद्व्यणुकादिवंततः काल्योपाधितयापिजनकत्वेनपाकजघटाद्युत्पत्तिप्राक्कालावच्छेदेनतद
धिकरणकालेकुलालादिकृतेपाकद्वारास्वप्रयोज्यविजातीयसंयोगीयकालिकविशेषणतापन्नत्वात्। रम॰
एवंखंडघटोत्पत्तिप्राक्कालावच्छेदेनापितदधिकरणकालेकुलालादिकृतेरवस्थितकपालद्वयसंयोग १९

रूपत्वप्रयोज्यविजातीयसंयोगीयकालिकविशेषणतासंबंधेनसत्वादिति। नन्वाचेष्टाद्वंद्वादेर्लघुत्वसंबं
धांतरेणाहेतुत्वसंभवेनघटत्वावच्छिन्नेस्वप्रयोज्यविजातीयसंयोगीयकालिकसंबंधेनहेतुत्वेपिकु
लालादिकृतेर्विजातीयकृतित्वेनलाघवाद्विषयत्वादिनैवहेतुत्वात्। एवमपिसर्गाद्यकालेस्वप्रयोज्य
विजातीयसंयोगीयकालिकविशेषणतयाकुलालादिकृतेः कथमपतत्वेनसर्गाद्यकालीनघटकर्तृ
त्वेनेश्वरसिद्धिरनपायाद्। अतएवघटाद्यनुकूलविजातीयकृतिमत्वादेरेवकुलालत्वादिरूपत्वेनेश्वर
स्याद्यकुलालादिरूपतयानमः कुलालेभ्यः कर्मारेभ्यश्चेतिश्रुतिरपिसाधुसंगच्छते। कर्मारोहि लोह
कारइतिमहाभास्करः। नचैवंतत्रजगत्कर्तृत्वमसिद्धं। श्रुत्यैवतत्सिद्धेः। अथघटत्वावच्छिन्नंप्रतिविजा
तीयकृतित्वेनहेतुता एवंपटत्वावच्छिन्नंप्रतिविजातीयकृतित्वेन। एवमन्यत्रापितथाचेश्वरकृतेः
सर्गाद्यकालीनघटपटादिजनकत्वेसांकर्यं तथाहिकुलालादिकृतौघटजनकतावच्छेदकं तत्रन
पटजनकतावच्छेदकं कुविंदकृतौचपटजनकतावच्छेदकं तत्रनघटजनकतावच्छेदकं एकस्यामीश्वर

वा० कृतीतयोः समावेशादिति चेन्न। उपाधिसांकर्यस्येव जातिसांकर्यस्याप्यदोषत्वात्। यत्तु घटत्वाद्यवच्छिन्ने विजा
१८ तीयचेष्टाया हेतुत्वावश्यकत्वेन विजातीयकृतेर्विषयतयास्वप्रयोज्यविजातीयसंयोगेन वा हेतुत्वे माना
भावः। वस्तुतस्तु कृतेश्चेष्टा तया विजातीयसंयोगस्तेन च घटादीनामनुभवेन घटत्वाद्यवच्छिन्नं प्रति विजा
तीयसंयोगत्वादिनैव हेतुत्वं न तु चेष्टाया अपि तावतैवाविर्वाहात्तथा च नोक्तरीत्येश्वरसिद्धिः संभवतीति
तन्न। एवमपि सर्गाद्यकालीनो घटो विजातीयसंयोगजन्यः पटत्वादिदानींतनघटवदित्याद्यनुमानेन स
र्गाद्यकालीनघटादिजनकविजातीयसंयोगसिद्धौ तज्जनकचेष्टाजनककृत्याश्रयत्वेन शरीरीश्वरसिद्धे
रक्षुण्णत्वात्। यदपि एवं सर्गाद्यकालीनघटं पक्षीकृत्य द्व्यणुकजन्यत्वसाध्यकघटत्वहेतुकानुमानबला
ज्जन्यद्व्यणुकजन्यत्वबाधेन निरुक्तद्व्यणुकजन्यत्वस्यापि तत्र सिद्ध्यापत्तिः। यदि च सामान्यतो घटत्वाद्यवच्छिन्नं प्र
तिद्व्यणुकत्वेन न हेतुता। किंतु तद्व्यावृत्तवैजात्यमंतीकृत्य तत्तदवच्छिन्नं प्रत्येव हेतुत्वं तथा चानुकूलतर्कविरहे एम०
णोक्तानुमानान्निरुक्तद्व्यणुकजन्यत्वसिद्धिरिति विभाव्यते तदा तादृशवैजात्यावच्छिन्नं प्रत्येव विजातीयसंयो १८

गत्वादिनाहेतुत्वोपगमात्रोक्तरीत्येश्वरासिद्धिरितितदपिमंदं। घटत्वाद्यवच्छिन्नंप्रतिविजातीयसंयोगत्वादि
नाहेतुत्वेनैवानिर्वाहेईश्वरस्यापिस्वप्रयोज्यविजातीयसंयोगेनहेतुत्वेमानाभावादितियदंति। तच्चिंत्यं। दंड
कुलालादीनांविरम्यव्यापारोपधायकत्वेनफलपर्यंतंसत्वस्यावश्यकत्वेनविनिगमनाविरहादेवतेषांहे
तुत्वस्यावश्यकत्वादिति। इदंतुचिंत्यं। तेजन्यत्वस्यजनकताघटितत्वंजनकतायाश्चस्वजनकतावच्छेदक
निष्ठकार्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वघटितत्वमितिनियमः एवंचात्रकृतित्वनिष्ठकार्य
तावच्छिन्नव्यापकतावच्छेदकत्वघटितजनकतावच्छेदकघटितजनकताघटितकृतित्वसाध्यत्वंसाध्यं
किंवाविजातीयकृतित्वनि— घटत्वाद्यवच्छिन्नव्यापकतावच्छेदकत्वघटितजनकतावच्छेदकघटित
जनकताघटितकृतिजन्यत्वंसाध्यंतत्रनाद्यः। कृतित्वेकार्यत्वावच्छिन्नव्यापकतावच्छेदकत्वस्याप्रसि
द्धत्वात् द्वितीयजनकताघटितकृतिजन्यत्वस्यसाधनासंभवात्। नांत्यः व्यभिचारात्सामानाधिकर
ण्येनसाध्यसिद्धेरुद्देश्यत्वेसिद्धसाधनात्। अवच्छेदकावच्छेदेनसाध्यसिद्धेरुद्देश्यत्वेचबाधात्। नच

बा० समवायेनकार्यत्वावच्छिन्नंप्रतिविषयतयाकालिकसंबंधेनकार्यत्वावच्छिन्नंप्रतिकालिकसंबंधेनतादात्म्य
१८ संबंधेनकार्यत्वावच्छिन्नंप्रतिसाध्यतारव्यविषयतयाकृतित्वेनहेतुत्वमितिपरास्तंतत्रपेयपाकमंविषय
तयाकृतिमदन्यस्मिन्समवायेनावृत्तित्वरूपंकालिकसंबंधेनकृतिमदन्यस्मिन्कालिकसंबंधेनाव
त्तित्वरूपंसाध्यतारव्यविषयतयाकृतिमदन्यस्मिन्तादात्म्येनासंबद्धत्वरूपंचकृतिजन्यत्वंजनकता
घटितमेवसाध्यमतोनोक्तदोषइतिवाच्यं।अंशेसिद्धसाधनात्।आद्ययोः नैयायिकानामप्रसिद्धेः॥
ईश्वरकृतेसर्वविषयकत्वात्आदिकत्वात्वा।नचकालिकसंबंधेनकृतिमद्द्रव्यत्वंनित्यगगनादा
वेवप्रसिद्धमितिवाच्यं।तत्रकालिकसंबंधेनवृत्तित्वस्याप्रसिद्धेः।नचकालिकसंबंधावच्छिन्नवृत्ति
त्वीयत्वरूपसंबंधावच्छिन्नप्रतियोगिताकः कालिकेसंबंधेनकृतिमदन्यवृत्तित्वाभावस्याप्यसंबव्य
धिकरणेसंबंधावच्छिन्नप्रतियोगिताकोघटादौप्रसिद्धएवेतिवाच्यं।एवंसतिसिद्धसाधनापत्तेरयो रम०
रापत्तेः।तस्माज्जनकत्वाघटितमतिरिक्तमेकंजन्यत्वंमित्यभिप्रायेणाह्योवोक्तानुपात्तावतारोद्वय १८

भ्यः वस्तुतस्तु साध्यताख्यविषयतासंबंधेन कृतिमत्त्वमेजन्यत्वाघटितं साध्यं लाघवादिति पूर्वमेवोक्तं तत्र
चनोक्तदोष । अपरे तु जन्माव्यवहितपूर्वकालः कालिकसंबंधेन कृतिमान् कार्याव्यवहितपूर्वकालता
कालत्वाद्वा लाघवव्यवहितपूर्वकालवृत्तजन्यविषयतासंबंधेन स्वाव्यवहितपूर्वकालीनकृतिमत्
कार्यत्वात् घटादिवत् स्वजन्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वविषयत्वोभयसंबंधेन कृतिमत्कार्यत्वा
द्घटादिवदित्याद्यनुमानानि प्रसिद्धसाध्यकानि निर्दुष्टानीश्वरसाधकान्यवसेयानीत्याहुरित्यलम
तिसूक्ष्मविचारेण । अत्र केचित् । उक्तानुमानेन क्षित्यंकुरादिजनककृतिसिद्धावपि न तदाश्रयतये
श्वरसिद्धिः । तस्याः श दिजनकगगनादिवन्नित्याश्रयत्वस्यापि संभवेन तदाश्रये प्रमाणाभावात् ।
कृतिर्द्रव्याश्रिता गुणत्वादित्याद्यनुमानानामप्रयोजकत्वात् । गुणत्वसाधकानुमानस्याप्यप्रयोज
कत्वेन तत्र गुणत्वे मानाभावाच्च । अन्यथा गगनादिकं द्रव्याश्रितं गुणजनकत्वाद्घटादिवदित्यनुमा
नेन गगनाद्याश्रयसिद्धिप्रसंगात् । न च परमाण्वादौ व्यभिचारः तस्य पक्षसमत्वादिति वदंति । तन्न

वा० संनिरूपाधिकसहचाररूपानुकूलतर्कसत्वेनोक्तानुमानेनैवतस्याद्यन्याश्रितत्वसिद्धेः।अन्यथातन्मात्रबल
१९ प्रवृत्तानांजात्यादिनासत्ताद्यनुमानानांविलयापत्तेः।विभुभिन्नत्वस्योपाधितयागगनादिपक्षकानुमा
नाजगगनाद्याश्रयसिद्धिः।किंचघटादिरूपकार्येकुलालादिकृतीनामिवकुलालादिरूपकर्तुरपिजनक
तयोक्तरीत्याकर्तृजन्यत्वानुमानात्क्षित्यंकुरादिकर्तृत्वेनेश्वरसिद्धिर्निराबाधैव।अत्रवदंति।घटादि
वृत्तिविषयतासंबंधेनज्ञानंप्रति घटादिवृत्तिविषयताबंधेनज्ञानस्यहेतुत्वावश्यकतयाघटादिनि
र्विकल्पकात्पूर्वंतादृशहेतुसंपर्कमीश्वरज्ञानस्वीकारआवश्यकत्वेतस्याश्रयत्वेनचेश्वरसिद्धिः।तथा
हि।घटादिचाक्षुषेघटादिचक्षुःसंयोगस्यसंनिकर्षविधयाहेतुत्वंनिर्विवादंतच्चात्मनिष्ठप्रत्यासत्त्या
नसंभवतिचक्षुःसंयोगस्यात्मन्यसत्वादतोविषयनिष्ठप्रत्यासत्त्यैवतद्वाच्यं।नचसाप्यभूतच
क्षुःसंयुक्तमनःप्रतियोगिकविजातीयसंयोगेनतस्यात्मनिसत्वमस्त्येवेतिवाच्यं।तथापिपरादे राम०
चक्षुःसंयोगदशायांमुक्तसंबंधेनचक्षुःसंयोगस्यात्मनिसत्वेनघटादिचाक्षुषापत्त्याघटादिचाक्षु १९

यंप्रति घटादिषु चक्षुःसंयोगस्योक्तमुक्तसंबंधेन विषयभेदेनानंतहेतुत्वस्य वाच्यतया तद्रूपेण द्रव्यवृत्तिलौकि
कविषयतासंबंधेन चाक्षुषत्वावच्छिन्नं प्रति समवायेन चक्षुःसंयोगस्य विषयमनिवेश्य विषयनिष्ठप्रत्या
सत्त्याहेतुत्वस्यैव लाघवेनोचितत्वात्। न च विषयनिष्ठप्रत्यासत्त्याहेतुत्वे एकपुरुषीयचक्षुःसंयोगदशा
यामन्यपुरुषस्य चाक्षुषापत्तिवारणाय तत्पुरुषीयत्वनिवेशेन गौरवमिति वाच्यं। विषयापेक्षया पुरु
षाणामल्पत्वात्। एवं च यत्र घटादावेव चक्षुःसंयोगस्तत्र समवायेनात्मनि घटादिचाक्षुषापत्तिः। न
च घटादिचाक्षुषत्वस्य कस्यचित्कार्यतानवच्छेदकतयावतदवच्छिन्नापत्तिरिति वाच्यं। घटादिचाक्षुषत्व
स्य घटादिचाक्षुषेच्छाविरहविशिष्टभिन्नविषयकानुमितिसामग्र्यभावस्यैव कार्यतावच्छेदकतया
वच्छिन्नत्वात्तदवच्छिन्नापत्तिसंभवात्। न च तदितरसंबंधेन कार्योत्पादकसामग्रीविशिष्टाया एव त
त्संबंधेन कार्योत्पादकसामग्र्याः फलव्याप्यतया न तदापत्तिरिति वाच्यं। तत्संबंधेन कार्योत्पादक
सामग्र्यां तदितरसंबंधेन कार्योत्पादकसामग्र्या एककालीनत्वसंबंधेनैव वैशिष्ट्यस्य निवेशनी

वा० पत्तपाश्चतदानींपरादौसत्वेनैववैशिष्ट्यस्यतत्रसत्वात् अतोघटादिवृत्तिविषयतासंबंधेनज्ञानंप्रतितेन
२० संबंधेनज्ञानस्यहेतुत्वंवाच्यंतथासतिनोक्तापत्तिः। समवायेनघटादिचाक्षुषोत्पादकसामग्र्याघटादि
वृत्तिविषयतासंबंधेनज्ञानविशिष्टचक्षुःसंयोगरूपविषयतासंबंधेनघटादिचाक्षुषसामग्र्याएकका
लीनत्वसंबंधेनाप्यभावात्। तदावीनादृशसामग्र्यांकाप्यसत्वात्तन्नचज्ञानत्वावच्छिन्नस्यविषयभे
देनानंतहेतुतानांसंनिकर्षस्यचभिन्नहेतुतायाः कल्पनापेक्षयासंनिकर्षस्यैवात्मनिष्ठप्रत्यासत्या
विषयभेदेनहेतुताकल्पनमेवोचितमितिवाच्यं॥ इंद्रियभेदेनलौकिकालौकिकप्रत्यक्षभेदेनच
विभिन्नसन्निकर्षहेतुतायांविषयमंतर्भावमपेक्ष्यविषयभेदेनज्ञानहेतुतायांभिन्नसन्निकर्षहेतुतायां
लाघवात्। नचोक्तापत्तिवारणायघटादिवृत्तिविषयतासंबंधेनज्ञानंप्रतितादात्म्येनघटत्वादिना
घटरूपविषयस्यैवहेतुतास्तुनतथाचनोक्तरीत्यैश्वरसिद्धिः संभवतीतिवाच्यं। एवमपियत्रघटत्वादावे एम०
वचक्षुःसंयुक्तसमवायस्तत्रोपदर्शितरीत्यासमवायेनात्मनिघटत्वादिचाक्षुषापत्तिवारणायघट २०

त्वादिवृत्तिविषयतासंबंधेन ज्ञानं प्रति तेन संबंधेन घटत्वादिज्ञानहेतुताया आवश्यकत्वेन घटत्वादि
निर्विकल्पकात्पूर्वं तादृशकारणासंपत्त्या धर्मीश्वरज्ञानस्वीकारस्यावश्यकत्वात्। न च तत्रापि घटत्वा
दिवृत्तिविषयतासंबंधेन ज्ञानं प्रति घटत्वत्वादिना घटत्वादेर्हेतुतयैवापत्तिवारणं संभवतीति वा
च्यं। घटेतरावृत्तित्वविशिष्टसकलघटवृत्तित्वरूपघटत्वत्वादिनाहेतुत्वापेक्षया घटत्वादिवृत्ति
विषयतासंबंधेन ज्ञानत्वेन हेतुतायां लाघवात्। न च घटत्वादिनिर्विकल्पकात्पूर्वमपि कस्यचि
त्पुरुषस्यावश्यं घटत्वादिज्ञानसत्वात्नेश्वरज्ञानस्यावश्यकतेति वाच्यं। एवमपि सर्गाद्यकाली
नघटत्वादिनिर्विकल्पकपूर्वं पुरुषांतरीयघटत्वादिज्ञानाभावेन तादृशकारणासंपत्त्या धर्मीश्व
रज्ञानस्वीकारस्यावश्यकतया नद्याप्रयत्नेनेश्वरसिद्धेर्ब्रह्मणापि वारयितुमशक्यत्वादिति। अ
त्रेदमवधेयं। कार्यत्वहेतुकपूर्वोपदर्शितानुमानादिवदायोजनत्वादिहेतुकानुमानादपीश्वरसिद्धिः॥

वा. तदुक्तमाचार्यैः। कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः॥ वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्य
२१ यः॥ इति। अत्र कार्यत्वादौ भावप्रधानो निर्देशः। प्राचीनमते तादात्म्यसंबंधस्य व्याप्यतानवच्छेदकत्वेनय
प्याकृतेऽनुपपत्तेः। पंचम्यर्थः प्रयोज्यत्वं अन्वयश्चास्य साध्यपदार्थानुमितिविषयैकदेशेऽनुमितौ तथा
च कार्यत्वायोजनत्वधृतित्वादिपदत्वप्रत्ययत्वश्रुतित्ववाक्यत्वसंख्याविशेषत्वात्मकबहुविधहेतु
प्रयोज्यानुमितिविषयो विश्वविषयकनित्यज्ञानाश्रयो नित्येश्वर इति कारिकार्थः। अत्रायोजनप
दार्थः करणव्युत्पत्त्या कर्म धृतित्वादौ सत्र्यादिपदार्थो नाशत्वं पदपदार्थः पद्यते गम्यते ज्ञायतेऽ
नेनेति व्युत्पत्त्या व्यवहारः प्रत्ययपदार्थः। प्रमा संख्याविशेषो द्वित्वादिः एवञ्च जन्यत्वं सकर्तृककार्य
त्वाददृष्टवत् सर्गाद्यकालीनद्व्यणुकारंभकपरमाणुसंयोगजनककर्म यत्नजन्यं कर्मत्वात् अस्मदादि
शरीरक्रियावत् ब्रह्मांडादिधृतिः यत्नजन्या धृतित्वात् आकाशे पतितधृतिवत् ब्रह्मांडादिविनाशः एम०
प्रयत्नजन्यः नाशत्वात् पाट्यमानपटनाशवत् सर्गाद्यकालीनघटपटादिव्यवहारः यत्नजन्यः २१

व्यवहारत्वात् इदानींतनघटपटानयनादिव्यवहारवत् वेदजन्यप्रमा गुणजन्या प्रमात्वात् प्रत्यक्षप्र
मावत् वेदः पौरुषेयो वेदत्वात् यत्रैवं तत्रैवं यथा गगनादि वेदः पौरुषेयो वाक्यत्वात् भारतवत् स्वर्ग
घकालीनद्व्यणुकपरिमाणजनकद्वित्वसंख्याऽपेक्षाबुद्धिजन्या द्वित्वत्वात् अस्मदाद्यपेक्षाबुद्धिजन
द्वित्ववदित्याद्यनुमानैरीश्वरसिद्धिरिति भावः। नचात्राप्रयोजकत्वमिति वाच्यं। सर्वत्रांततो निरुपधिस
हचारस्यैवानुकूलतर्कत्वात् वेदत्वं च न जातिः कत्वादिना संकरात् किंतु विजातीयधर्मजनकाध्ययनप्र
तियोगित्वं। लौकिकवाक्यभिन्नवाक्यत्वं वा। मणिकृतस्तु शब्दशब्दोपजीविप्रमाणातिरिक्तप्रमाणज
न्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वं अत्रत्यस्वर्गादिसाध
नत्वविशिष्टयागादिरूपस्य स्वर्गकामो यजेतेत्यादिवेदार्थस्यस्य घटकीभूतालौकिकस्वर्गादेः शब्द
तच्छब्दोपजीविप्रमाणाभ्यामतिरिक्तेन प्रत्यक्षादिप्रमाणेनाग्रहणात् वेदे निरुक्तप्रमाणजन्यप्रमिति
विषयार्थकत्वमिति तत्त्वं घटोस्तीत्यादिलौकिकवाक्यस्यैव तद्भिन्नत्वं शब्दजन्यवाक्यार्थज्ञानजन्यप्रमा

वा० रतत्वमस्यादिवाक्यानां तत्त्वं प्रमाणशब्दत्वं च वेदेस्तीति लक्षणसमन्वयः । घटोस्तीत्यादिलौकिकवाक्येतिव्याप्ति
१२ वारणाय सत्यंतं वेदात्मकशब्दप्रमाणेन साध्यादिसिद्धिनिर्वाहक शब्दोपजीविनायागः स्वर्गसाधनं स्वर्गसा
धनतावच्छेदकरूपवत्त्वादित्यनुमानादिप्रमाणेन च वेदार्थस्य ग्रहणादसंभव इति शब्दः शब्दोपजीविप्र
माणातिरिक्तत्वं प्रमाणविशेषणं । घटोस्तीत्यादिवाक्यार्थस्यापि शब्देन तदुपजीविनानुमानेन च ग्रह
णादिति प्रत्यक्षादीनां शब्दोपगतोदरवस्थमितिमेदइयघटनं । न च चक्षुरादेरुपजीवित्वेन तद्ग्राह्यार्थकलौकि
कवाक्यातिव्याप्तिरस्त्वेवेति वाच्यं । शब्दसहकृतेन येन प्रमितिर्जन्यते तस्य शब्दोपजीविप्रमाणपदे
न विवक्षणात् । अत एव तादृशार्थज्ञानायैव प्रथमप्रमाणपदमपि सार्थकं । द्वितीयप्रमाणपदं चास
भववारणाय वेदस्य मानार्थकस्मृतिभारतादिवाक्येतिव्याप्तिवारणाय शब्दजन्येत्यादिदलं । जन्यवाक्यार्थ
ज्ञानाजन्यत्वनिवेशो मीमांसकनैयायिकोभयसाधारणवेदत्वस्य निर्वक्तव्यतया मीमांसकमते ज्ञाने एम०
जन्यत्वस्याव्यावर्तकतया जन्यवाक्यार्थज्ञानाजन्यत्वस्याभावप्रतियोगितावच्छेदकत्वेन तद्विच्छिन्नभेद १२

रूपतादृशवाक्यार्थज्ञानाजन्यत्वस्याप्रसिद्धेरितितानेशब्दजन्यत्वविशेषणं॥ अत्रशब्दजन्यत्वंशाब्दप्रयोज्य
त्वंअन्यथावेदशब्दप्रयोज्यस्मृत्यादिरूपवाक्यार्थज्ञानजन्यस्मृत्यादावतिव्याप्तितादवस्थ्यात्॰ दृष्टोवह्नि
मानित्यादिवाक्यवारणायतत्तीयंप्रमाणपदं॰ मनसोवारणायचरमशाब्दत्वोपादानं॰ ननुचभुराद्रिता
घटादिरूपलौकिकवाक्यार्थज्ञानजननेपिकुत्रचिद्विशेषणज्ञानद्वाराविशेषणबोधकशब्दस्यसहका
रित्वेनचभुरादेरपिनिरुक्तशब्दोपजीवित्वसत्वेनतादृशचभुराद्रिमात्रगृहीतार्थकेलौकिकवाक्येऽति
व्याप्तिः। नचशब्दसहकारेणैवयेनप्रमितिर्जन्यतेतत्वस्यविवक्षणात्रोक्तदोषइतिवाच्यं॥ तथासतिस्वर्ग
साधनत्वाद्यनुमापकस्वर्गसाधनतावच्छेदकयागविशेषत्वादिरूपलिंगात्मकानुमानेनस्वलिंगकस्
णत्वाद्यनुमितिजननेशब्दस्यासहकारितयातादृशानुमानस्यशब्दोपजीविप्रमाणातिरिक्तत्वेनतद्व्या
प्तकत्वस्यवेदेसत्वेनासंभवापत्तेरितिचेन्न। शब्दसहकारेणैवयेनस्वजन्यज्ञानसमानविषयकप्रति
तिर्जन्यतेतदन्यप्रमाणागम्यार्थकंपयत्वंनदन्यत्वेनिवेशेनोक्तदोषाभावात्॰ प्रथमस्यपदंचपत्रलक्षणसम
प्र

वा॰ न्यपत्तम्परं द्वितीयं स्वपदं च भेदप्रतियोगीपरं तदन्यत्वनिवेशेनोक्तदोषाभावात्तेषु गगनाद्यनुमितेर्वेदजन्यत्वान
२२ समानविषयकत्वाभावात्॥ तत्समानविषयकानुमित्यादेश्चोक्तानुमानेनजननेशब्दस्यसहकारितानिय
मेनचेदस्यत्वेउक्तानुमानादेशाब्दोपजीवित्वात्॥ एतेनात्रचक्षुरादिजन्यवेदार्थगोचरोपनीतमानादिक
मादायासंभवस्त्वपिपरास्तंतादृशोपनीतमानादिजनकचक्षुरादेरपिवेदस्यस्वपदेनोपादानेनोक्तरीत्याश
ब्दोपजीवित्वसत्वात्॥ नचैवमपिपादृशचक्षुरादिव्यक्त्याशब्दजन्यविशेषणज्ञानसहकारेणैवयादृश
वाक्यार्थज्ञानंजनितंतादृशचक्षुरादिमात्रग्राह्यार्थकतादृशार्थकवाक्येऽतिव्याप्तिरस्त्येवेतिवाच्यं।तादृ
शवाक्यजनकवक्तृवाक्यार्थज्ञानस्यापिशब्दप्रयोजकत्वेनतस्यशब्दजन्यवाक्यार्थज्ञानाजन्यत्वदलाभावेनै
वातिव्याप्तिवारणात्शब्दजन्यपदस्योक्तरीत्याशब्दप्रयोज्यार्थकतेपाश्चावश्यकत्वेनप्रत्यक्षीहृहपवक्तृ
वाक्यार्थज्ञानस्यशब्दाजन्यत्वेपिशब्दाधीनविशेषणज्ञानजन्यत्वेनशब्दप्रयोज्यत्वात्।एतेनात्रशब्दो राम॰
पजीवित्वेनेनशब्दजन्यवाक्यार्थज्ञानोपजीवित्वंविवक्षितं।अन्यथायत्रप्रत्यक्षेणशब्दं ज्ञात्वाचैत्रः श २२

ध्वानिसुपनीतभानानंतरं चैत्रः शब्दापतेरिति प्रयोगस्तत्र शब्दघटितार्थबोधकवाक्यार्थप्रसक्तजन्येऽ
तिव्याप्त्यापत्तेरित्यपि परास्तं॥ तत्र शब्दप्रयोज्यवाक्यार्थप्रसक्तजन्यत्वेन शब्दजन्येऽस्मादिदृष्टाभावादेवा
तिव्याप्त्यनवकाशात्। वेदवाक्यार्थज्ञानं विनैव शब्दजन्यतादृशवाक्यार्थघटकविशकलितस्वर्गादिपदा
र्थोपस्थितितो वेदार्थगोचरानुमानसंभवेनासंभवापत्तेश्च। नच तत्पापघ्नीर्हिमस्य भेषजं ज्वरहरणकामो
दशमूलीकषायं पिबेदित्यादिदृष्टार्थकवेदेऽव्याप्तिरिति वाच्यं। गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत
भिषक्स्वभेषजैरित्यादिकवाक्यतयाऽनिभेषजदानादिना गुर्वादीन्प्रतिकुर्वीतेत्यलौकिकार्थस्यापन
त्वाद्युपस्थितजात्यर्थविषयत्वादिति वदंति तत्र वेदसमानार्थकवेदविपरीतानुद्धृत्वी एवाभ्युक्तादिवाक्यादा
वत्तिव्याप्तेर्गौरवाच्च। एतेन मंत्रब्राह्मणान्यतरत्वं वेदत्वमित्यपि प्रत्युक्तं। ननुत्वाद्यवात्रसरेणवेव विश्रामे
णपरमाणुद्व्यणुकयोरेव प्रमाणाभावेन कथं चरमानुमानस्येश्वरसाधकत्वमिति चेन्न। परमाणुद्व्यणु
कयोरंगीकारे घटादेस्त्रसरेणुपुंजस्वरूपत्वे वा घकाभावेनातिरिक्तावयविविलोपापत्तेः। तदंगीकारेनुप

वा० रमाणोरतीन्द्रियत्वापत्त्या घटादेः परमाणुपुंजस्वरूपत्वानुपपत्त्यातिरिक्तावयविसिद्धेः सुलभत्वात्। न च घटादेस्त्र
२४ सरेणुपुंजस्वरूपत्वे स्पार्शनप्रत्यक्षस्यानुपपत्तिरिति वाच्यं। त्रसरेणोः स्पार्शनप्रत्यक्षस्याभ्युपगमात्। अत एव
दीधितिकृता पिठरस्पार्शनत्वेनुभवसिद्धमहत्त्वमपि तत्पेत्यत्रानुशब्देन तदभ्युपगमः सूचितः। न च तत्पोरंगीका
रेपि घटादेस्त्रसरेणुपुंजस्वरूपत्वे बाधकाभाव इति वाच्यं। तथात्वेपि निरवयवत्वप्रसंगाभावात्। त्रसरेणु
पुंजस्य चतुरणुकादिपुंजस्य वा घटादिस्वरूपत्वमित्यत्र विनिगमकाभावेनातिरिक्तावयविसिद्धेर्निष्प्र
त्यूहत्वात्। न च तत्पोरंगीकारेपि उक्तरीत्या विनिगमकाभावेनातिरिक्तावयविसिद्धिः संभवत्येवे
ति वाच्यं। त्रसरेणोः प्राथम्यस्यैवाणुरूपतिन्यायेन विनिगमकत्वात्। वस्तुतस्तु तत्पोरंगीकारे समवेन
वास्तुपत्तावच्छिन्नप्रति चक्षुस्संयुक्तसमवेतसमवायत्वेनैकहेतुत्वे पैव निर्वाहः। तत्पोरंगीकारे तु त्रस
रेणुतद्रूपादिचाक्षुषानुरोधेन तद्व्यक्तिचाक्षुषे च चक्षुस्संयोगस्य तद्व्यक्तिसमवेतचाक्षुषे च चक्षुःसंयुक्तसमवाय रम०
स्यानंतपुरुषभेदभिन्नहेतुत्वमधिकं कल्पनीयमिति पुनस्तत्पोरंगीकार आवश्यकः। एतत्पोरंगीका २४

रोपितत्रुटितत्सन्निकर्षात्तदीयरूपरूपत्वादिचाक्षुषवारणाय चक्षुःसंयुक्तसमवेतसमवायत्वेन हेतुतायां मह
त्त्वादिकमेव शरणं निवेशनीयं तथा च त्रसरेणुतद्रूपादिचाक्षुषे व्यभिचारेण द्रव्यमस्मिन्समवेतं तच्चाक्षु
षत्वस्यैतज्जन्यतावच्छेदकत्वात्त्रसरेणुतद्रूपादिचाक्षुषानुरोधेनोक्तकार्यकारणभावद्वयमावश्यक
मिति लाघवाभावेन तयोरनंगीकार एवोचित इति नवीनैरुक्तं। तन्न विचारसहं अतीन्द्रियगुरुत्वादीनां प्र
त्यक्षवारणाय लौकिकप्रत्यक्षत्वावच्छिन्नं प्रति लौकिकविषयतया प्रत्यक्षं च महद्रूपविषयत्वेन हेतुत
स्यां च मतपाव्यक्तिं विनाजातेरभावेन च तत्रुटितत्संनिकर्षात्तदीयरूपरूपत्वादिचाक्षुषवारणसंभवेन
चक्षुःसंयुक्तसमवेतसमवायहेतुत्वस्य च मतपाव्यक्तिं तायां महत्त्वनिवेशं विनैवोपपत्तेरिति वस्तुत
स्तु त्रसरेणावेव विश्रामेऽपि चतुरणुकारंभकत्रसरेणुसंयोगजनककर्मपक्षकानुमानेनेश्वरसिद्धेर्दु
र्वारत्वादिति सारं केचित्तु आत्माभिप्रायो विधेयः। पाकं कुर्याः पाकं कुर्यामित्यादि मध्यमोत्तमपुरुष
योः। लिङिच्छाविशेषात्मकताध्येषणानुमत्यप्रार्थनार्थकतायाः प्रथमपुरुषीयेच्छामेव श

वा॰ तेरुचितत्वात्॰ भयजनकाहीच्छाज्ञातनिषेधाभावपंजकेच्छानुज्ञा उत्तरेस्मयोजिकेच्छाप्रश्नप्राप्तीच्छाप्रार्थनेतिवि
२५ वेकः। स्वर्गकामोयजेतेत्यादौयागः स्वर्गः कामनिष्ठतयाज्ञातेच्छाविषयइत्यादिःशाब्दबोधः। वेदेचायोभ
गवानेव॰ यस्तुवेदेयोरुषेयत्वंनांगीकरोतितंप्रतिविधिरेवगर्भइवश्रुतिकुमार्याः पुंयोगेमानं। तथाचेच्छा
याविध्यर्थत्वेनवैदिकविधिप्रतिपाद्येच्छाआत्मसमवेताइच्छात्वात्लौकिकविधिप्रतिपाद्यास्मदादीच्छा
वदित्याकारकादवच्छेदकावच्छेदेनात्मसमवेतत्वसाध्यकानुमानादीश्वरसिद्धिरित्याहुः। तत्रशोभनं।
कृतसाध्यत्वनिष्पन्नत्वानिष्टसाधनत्वज्ञानकालेप्रवृत्तिवारणायप्रवर्त्तिंप्रतिकृतिनिसाध्यत्वेष्टसाध
नत्वबलवदनिष्टाननुबंधित्वज्ञानहेतुतयाप्रवर्त्तकज्ञानविषयस्यैवविध्यर्थतयाकृतिसाध्येष्टादीनां
विध्यर्थत्वस्यावश्यकत्वेनआप्ताभिप्रायस्यविध्यर्थत्वेप्रमाणाभावात्॥ अथकृत्यसाध्यताज्ञानकाले
प्रवृत्तिवारणायसाध्यतासंबंधेनकृतिप्रकारकज्ञानमेवप्रवर्त्तकमुच्यतेलाघवात्। नतुकृतिसाध्य एम॰
ताज्ञानंतथातस्यतथात्वेप्रवृत्तिकारणतावच्छेदककोटौसाध्यत्वस्यापिसंबंधनिवेशेगौरवात्। तथा २५

चाख्यातत्वेनाख्यातस्य कृत्याकृतिसामान्यशक्तौ च निर्वाहे लि – दिविधौ कृतिसाध्यत्वेन स्वातंत्र्येण श
क्तिरिति चेन्न आख्यातत्वेनाख्यातार्थकृतेः क्रियाविशेष्यत्वेनैवान्वयबोधस्य च तीमा दोयुक्तत्वेन क्रि
याविशेषणतया बोधासंभवेन लिङादिविधेः स्वातंत्र्येण कृतिसाध्यत्वे शक्तिकल्पनस्यावश्यकत्वात्॥
न च व्युत्पत्तिभेदकल्पनात्र दोष इति वाच्यं॥ शक्तिभेदं विना व्युत्पत्तिभेदकल्पने प्रमाणाभावेन व्युत्पत्तिभे
दस्य च नापेव शक्तिभेदस्यावश्यकत्वात्॥ किंच आख्यातत्वस्यैकस्याभावेन तिङ्त्वनस्त्वादीनामेव कृति
शक्ततावच्छेदकतयाऽन्यप्रशक्तिकल्पलिङादिविधेः कृतिसाध्यत्वे स्वातंत्र्येण शक्तिकल्पनमावश्य
कं॥ न चास्तु स्वातंत्र्येण शक्तिस्तथापि सा लाघवात् कृतित्वावच्छिन्ने एव कल्प्यतां न तु कृतिसाध्यत्वा
वच्छिन्ने गौरवादिति वाच्यं॥ यस्मात् न पादशधर्मप्रकारेण निपतोपस्थितिस्तस्य दस्यताद्दशधर्म एव
शक्यतावच्छेदकत्वस्यानुभवानुरोधेन कल्पनीयतया लिङादिविधितो नियमतः कृतिसाध्यत्वत्वावच्छि
न्नोपस्थितेस्तद्धर्मावच्छिन्ने शक्तिकल्पना गौरवस्यादोषत्वात्॥ अन्यथा वेदपदस्वर्गपदादीनामपि गुरु

वा०
धर्मावच्छिन्नशक्तिविलोपापत्तेः। ननु कृतिसाध्यताज्ञानस्य प्रवृत्तिहेतुत्वे मानाभावः कृतसाध्यताज्ञानकालेप्र
२६ वृत्तिवारणायावश्यकॢप्तनियतपूर्ववर्तिताकस्य कृतसाध्यताज्ञानाभावस्यैव प्रवृत्तिहेतुत्वौचित्यादि
ति चेन्न। कृतसाध्यताज्ञानाभावस्य सर्वदा सत्वेन सर्वदा प्रवृत्त्यापत्तेः। कृत्यसाध्यसाध्यताज्ञानाभावत्वेन
हेतुत्वे हेतुतावच्छेदकगौरवेण लाघवेन कृतिसाध्यताज्ञानत्वेनैव हेतुत्वौचित्यात्। अथ कृत्यसाध्यताज्ञा
नाभावस्य हेतुत्वे प्रवृत्तिं प्रति देशः कृत्यसाध्यपाकवानित्यादि कृत्यसाध्यत्वविशिष्टवैशिष्ट्यावगाह्यनु
मितिसामग्र्याः प्रतिबंधकत्वाकल्पनेन लाघवं तादृशानुमितिसामग्रीकाले विशेषणतावच्छेदकप्रका
रकनिर्णयविधया कॢप्तहेतुताकस्य कृतसाध्यतानिश्चयस्यावश्यकतया कृतसाध्यत्वज्ञानाभावाभावे
नैव प्रवृत्त्यनुत्पत्तिनिर्वाहादिति चेन्नैवं। कृतिसाध्यताज्ञानस्य हेतुत्वेपि बहुविधलाघवसंभवात्।
तथाहि। कृतिसाध्यताज्ञानस्य हेतुत्वे कृतिसाध्यत्वप्रकारकपाकादिविशेष्यकज्ञानत्वावच्छिन्नाभा रम०
वमानसंप्रतिपाकादिगोचरप्रवृत्तिसामग्र्याः प्रतिबंधकत्वेन कल्प्यते तादृशप्रवृत्तिसामग्रीकाले पाक २६

दिविशेष्यकत्वकृतिसाध्यत्वप्रकारकज्ञानस्यावश्यकत्वेन कृतिसाध्यत्वप्रकारकपाकादिविशेष्यकज्ञानाभावस्या
नतेस्वरूपसत्पाकादिविशेष्यककृतिसाध्यत्वप्रकारकज्ञानस्यावश्यकत्वस्य प्रतिबंधकत्वेनैवोपपत्तेः भ
वन्मते तादृशमानसंप्रति तादृशप्रवृत्तिसामग्र्याः प्रतिबंधकत्वकल्पनेन महद्गौरवं। एवं अप्रामाण्य
विशिष्टकृतिसाध्यत्वप्रकारकपाकविशेष्यकज्ञानवानहमित्यादिमानसे पाकादिगोचरप्रवृत्तिसाम
ग्र्याः प्रतिबंधकत्वं मया न कल्प्यते तादृशविशिष्टविषयताशालिमानससामग्रीकाले अप्रामाण्य
ज्ञानानास्कंदितकृतिसाध्यत्वप्रकारकपाकादिविशेष्यकज्ञानस्यावश्यकत्वेनाप्रामाण्यज्ञानानास्कं
दितकृतिसाध्यत्वप्रकारकपाकादिविशेष्यकज्ञानघटितप्रवृत्तिसामग्र्या अभा प्रवृत्तिसामग्री
तादृशमानससामग्र्योर्मिलनस्यैवासंभवात् भवन्मते कृतिसाध्यत्वप्रकारकपाकादिविशेष्यक
ज्ञानाभावघटितत्तादृशप्रवृत्तिसामग्रीतादृशमानससामग्र्योर्मिलने बाधकाभावेन तादृश
प्रवृत्तिसामग्र्याः प्रतिबंधकल्पनस्यावश्यकतया महागौरवापत्तेः। अनयैव वरात्ताइष्टास

वा०
२७

धनत्वज्ञानाभावस्य बलवदनिष्टाननुबंधित्वज्ञानाभावस्य च न प्रवृत्तिहेतुत्वं किंतु इष्टसाधनताज्ञानस्य बलवद
निष्टाननुबंधित्वज्ञानस्य च प्रवृत्तिहेतुत्वं इत्यन्यत्रसत्वमतिशयविस्तरेण॥ ॥ ईश्वरोस्ति न संदेहः
कस्यापि जगतीतले॥ तथापेतत्प्रसंगेनेश्वरनामानुसंहितं॥१॥ ईश्वरानुग्रहाद्देवेश्वरवादोपमस्तुतः
महादेवेन रचितस्तनोतु सुधियां सुखं॥२॥ स्वीयंपोग्रंपमन्मस्यप्यतद्धीपंचात्मकर्तकं॥ वह्निशी
घ्रंभ्रपत्तस्यतावुवोजारजातकौ॥३॥ इति श्रीमत्पद्वाक्यप्रमाणज्ञपुणतामकरोपनामश्रीमुकु
दपंडितात्मजमहादेवपंडितविरचितेश्वरवादस्समाप्तः॥ ॥ शुभंभवतु॥ ॥ श्रीः

ए०
२७

भा।   धा४   वंत्रा१   न निउकसे

अपरसाधनपदार्थैकदेशे व्याप्तिप्रकारौ निरूपितविषयप्रकारतायां वष्यत्वं तद्वह्निपदप्रतिपाद्यस्य वह्निनिष्ठत्वस्य स्वरूपसंबं-
धेन साधनपदार्थौ प्रकारताद्वये समवायेतार्थे निर्वह्नित्वादिविशिष्टविशेष्यतायाश्च निरूपितत्वं पेनान्वयः साधनपदो स२
३ द्वितीयं तासम्बन्धानिरूपकत्वं चार्थः निरूपकत्वे च निरुक्तसाधनपदार्थयोः तथान्वयः न द्वितीयविधिष्ठेयोरन्वयः द्वितीयान्वितत्वादृश
निरूपकत्वं यो अवच्छेदकपदार्थघटकाभावेऽन्वयः तथा च निर्वह्नित्वविशिष्टविशेष्यतानिरूपितवह्निनिष्ठप्रकारतानि-
त्वं५ रूपकत्वस्य तादृशविशेष्यतानिरूपिता या वह्निप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारतानिरूपिते त५
कं६ कत्वस्य चद्वयोरभावकप्रयोजनमान्यवृत्तिविषयतानिरूपकाभावान्वयबोधः प्रतिबंधकीभूतभ्रमविषयविषयितानिरूप निरूवा८
काभावादिमत्त्वमादाय पर्वते वह्निसाधने धूमो दुष्ट इत्यादिवाक्यप्रयोगवारणाय विषयितानिरूपकत्वं निवेशितं। यंत्रमा७
दोषघटककेवलसाध्याद्यो दोषस्य तादृशाभावादत्राये दोषत्वादौ स्वविषये निश्चयाव्यवहितोत्तरज्ञानिनिष्ठताद क
का शेषभ्रमबाधिकरणताप्रयोजकाधिकरणता व्यापकविरोधिविषयताप्रयोजकत्वाकधर्मएवदोष
वृत्तिसामान्य परेणार्थ इति दिक् असाधारण्यपक्षवृत्तित्वे सति साध्यव्यापकीभूताभावप्रतियोगित्वात्मकं
निरुक्तिः स्यसत्प्रतिपक्षाभिन्नत्वाध्याभावव्याप्यवत्त्वरूपस्य बुद्धेः विरोधिविषयकतया साध्य
वत्ताज्ञानप्रतिबंधक